A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

T. CHANDRASEKHARAN, M.A., L.T.

Curator, Government Oriental Manuscripts Library, Madras

(*Prepared under the orders of the Government of Madras*)

Volume XXXI Supplemental

(D. Nos. 17201 to 17700)

PRINTED BY THE SUPERINTENDENT
GOVERNMENT PRESS
MADRAS
1951

TABLE OF TRANSLITERATION.

	Consonants.	Semi-vowels sibilants, and aspirate.	Vowels.	Diphthongs.
Gutturals ..	k, kh, g, gh, ṅ	h, ḥ	a ā	e, ai.
Palatals	c, ch, j, jh, ñ	y, ś	i ī	
Linguals ..	ṭ, ṭh, ḍ, ḍh, ṇ	r ṣ	ṛ ṝ	
Dentals	t, th, d, dh, n	l, s	ḷ	
Labials	p, ph, b, bh, m	v	u, ū	o, au.

INTRODUCTION.

The thirty-first volume of the Descriptive catalogue of Sanskrit manuscripts contains the description of manuscripts from D. Nos. 17201 to 17700 and is prepared on the same plan as that of the other volumes of this series. The numbering of the manuscripts and the pagination of the volume are in continuation of those of the thirtieth volume.

Besides the table of contents, a subject index, an author index, and a general index have been added to this volume also. Attention is drawn below to a few of the important and rare works described in this volume :—

(1) Jñānapradīpikā—D. No. 17369. This is a treatise on Astrology and Divination, laying down certain rules for inferring the replies to be given from the figure told or the posture assumed by the person who puts the question. This contains 29 chapters, the names of which have been given in the description of this work.

(2) Bodhayanasūtrakārikā—D. 17396.—This is a work dealing with ritualistic procedure relating to the Syenacid sacrifice in verse. The author of this work is Vasudeva Dīkṣita, the famous author of Bālamanoramā, Adhvara- mīmāṁsākutūhalavṛtti and so on.

(3) Merutantram—D. No. 17463.—This is a work on magic. This contains only 4 Upadeśas or chapters 5, 7, 10 and 11. The author of this work is not known. A similar work has been described under R. No. 2577 bearing the title Indrajālakautukam written by Siddhanātha.

(4) Aṅgadadautyam—D. No. 17534. The story dealt with herein is taken from Śrīmad Rāmāyaṇam. Aṅgada, son of Vāli is sent on an embassy to Rāvaṇa. It is an interesting work though very small.

(5) Bāṇāsura yuddha prabandhaḥ—D. No. 17601.—The subject of this Campū is the defeat of the giant Bāṇāsura whose daughter was married to Aniruddha, son of Pradyumna and grandson of Kṛṣṇa. Aniruddha, who had

been imprisoned by his father-in-law, was liberated and in the fight that ensued Bāṇāsura was defeated.

(6) Harilīlā by Boppadeva or Vopadeva—D. No. 17603.

(7) Harilīlāviveka by Hemādri—D. No. 17604.—Hari-līlā is a brief indication of the contents of Bhāgavata, while the Harilīlāviveka is a commentary on the same. The author of the text is Boppadeva. He is the son of Bhiṣak Keśava, grandson of Mahādeva and a disciple of Dhaneśa. Keśava or Bhisakkeśava was a doctor and has written several books on medicine, on one of which, *viz.*, Siddhamantra, Vopadeva has commented.

Vopadeva has composed ten books in Sanskrit grammar, nine books in medicine, one book in Dharma śāstra, three books in Sanskrit literature and three books regarding the contents of Bhāgavata.

यस्य व्याकरणे वरेण्यघटनास्फीताः प्रबन्धा दश
प्रख्याता नव वैद्यकेऽथ तिथिनिर्धारार्थमेकोऽद्भुतः ।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयस्तस्य भु-
व्यन्तर्वाणिशिरोमणेरिह गुणाः के के न लोकोत्तराः ॥

Vide Harilīlāviveka. D. No. 17604 (pp. 11165).

It appears that Hemādri was his patron and commentator. Vopadeva has composed some works under the orders of Hemādri, the author of Caturvargacintāmaṇi and the minister of King Mahādeva.

विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्बोपदेवेन मुक्ताफलमचीकरत ॥

Vide R. No. 3079.

It is interesting to note that Hemādri, the Minister of king Mahādeva, had some association with one Rāmarāja.

हरिलीलाविवेकोऽयं रामराजस्य वेश्मनि ।
निकटे रचयांचक्रे तुष्ट्यै हेमाद्रिणा सताम ॥

Ibid.

It is not known whether Hemādri was a minister both to Mahādeva and Rāma in different times, or whether Mahādeva was also known as Rāma.

This author is quoted in Mādhava's Dhātuvṛtti and Bhaṭṭoji's Śabdakaustubha. In the Colophon of the work Mugdhabodha, it is mentioned that this author was called Vopadeva gosvāmī and hence it may be presumed that he belonged to Vallabha cult like Rūpagosvāmī.

आचार्यचक्रचूडामणिश्रीलश्रीवोपदेवगो स्वामिविरचितं
मुग्धबोधव्याकरणं समाप्तम् ॥

Vide D. No. 15619.

In addition to Harilīlā, the following among his works are available in this library ;—

(1) Kavikalpadruma.

(2) Kavikalpadrumavyākhyā—Kāmadhenuḥ.

(3) Siddhamantra vyākhyā—Prakāśaḥ.

(4) Bhaktimuktāphalam.

(5) Mugdhabodhaḥ.

T. CHANDRASEKHARAN,

Curator, Government Oriental Manuscripts Library.

MADRAS, *22nd March* 1951.

CONTENTS

SUBJECT INDEX

AUTHOR INDEX

GENERAL INDEX

[NOTE.—The names printed in italics are those of the works described.]

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

Volume XXXI

SUPPLEMENTAL

D. No. 17201

Pages, 85. Lines, 6—7 on a page. Telugu. Good. Extent, 1,785 granthas.

आपस्तम्बपूर्वप्रयोगः ।

ĀPASTAMBAPŪRVAPRAYOGAḤ.

Begins on fol. 10*a* of the MS. described under D. No. 17198.

Similar to the work described under D. No. 3695.

Beginning :

अरिष्टनिरसनेशान्ये शाम्यं घोराणि नैर्ऋतौ ।
अन्यत्र मार्जनं कुर्याच्चतुर्दिक्षु च विन्यसेत ॥
अरिष्ट(नि)रसनेशान्ये शाम्यं घोराणि नैर्ऋतौ ।
अन्यदिक्प्र(दिक्षु)क्षिपेच्चैव कर्तुरायुःक्षयो भवेत् ॥
अचलं चलमित्याहुर्वामे दक्षिणतस्तथा ।
अचल वामपार्श्वे तु दक्षिण चलन भवेत् ॥

* * * *

नान्दी—

सीमन्तचतुर्थव्रतचौलनामकरणपुंसवनान्नप्राशनोपनयनगोदानसमावर्तनविवाहसोमयागसुतोत्पत्तिवनादिप्रतिष्ठागृहप्रवेशसुतावलोकनाश्रमस्वीकारादिनृपाभिषेकाधानेषु नान्दीमुखं भवेत् । तत्र मातृश्राद्धपूर्वकं कुर्यात् ।

नामान्नचौलसीमन्तसोमोपनयपुंसवे ।
स्नानाधानविवाहेषु नान्दीश्राद्धं विधीयते ॥

* * * *

प्राणानायम्य । एवंगुणविशेषविशिष्टायां शुभतिथौ इमं कुमारं जातकर्मणा संस्करिष्ये । दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परिजातवेदाः । तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जगते स्वाधीः ।

* * * *

एव गुणविशेषविशिष्टायां शुभतिथौ कन्यार्थमागतं वरं मधुपर्केण पूजयिष्ये । अथ वराय मधुपर्कं कुर्वन्नुदगग्रं कूर्चं निदधाति । 'राष्ट्रभृतस्याचार्यासन्धीमात्वदोषम्' इति वर उपविशति ।

* * * *

ओं (पासनाग्निपुनः) सन्धानविधिं व्याख्यास्यामः । आपस्तम्बानुसारेण शुचिर्भूत्वा स्नात्वा कर्ता शरीरशुद्ध्यर्थं सुवर्णकृच्छ्राचरणं कृत्वा होमातीतकालप्रायश्चित्तार्थं तद्धोमद्रव्याणि ब्राह्मणाय दत्वा वधूं दक्षिणतः उपवेश्य स्वयमुत्तर आसीनः प्राणानायम्य

End :

अनयाहुत्या तच्छमयामि शर्वं तृप्यन्तु देवा अवृधेतां घृतेन स्वाहा देवेभ्य इदम् । एकम् । द्वे । त्रीणि । चत्वारि । त्रयास्त्रिंशत्तन्तवो वो ये वितत्निरे । ये इमं यज्ञं स्वधया ।

D. No. 17202

Palm leaf. 13½ × 1⅞ inches. Pages, 182. Lines, 7 on a page. Grantha. Good. New. Extent, 1,642 granthas.

सच्चरित्रसुधानिधिः by वीरराघव ।

SACCARITRASUDHĀNIDHIḤ by Vīrarāghava.

Same work as that described under D. No. 2863.

Complete; but some leaves are wanting in the middle. Some broken leaves which may be in the middle are attached in the last.

D. No. 17203

Palm leaf. 13½ × 1⅝ inches. Pages, 248. Lines, 10 on a page. Grantha. Slightly injured. Old. Extent, 3,720 granthas.

ब्रह्मसूत्रव्याख्या—तत्त्वमार्ताण्डः by श्रीनिवास ।

BRAHMASŪTRAVYĀKHYĀ—TATVAMĀRTĀṆḌAḤ by Śrīnivāsa.

Same work as that described under D. No. 4894.

Begins in the middle of the "Īkṣatyadhikaraṇa" in the first pāda of first Adhyāya and breaks off in the first adhikaraṇa of the second pāda of the same Adhyāya. Some leaves are wanting.

D. No. 17204

Pages, 72. Lines, 5 on a page. Telugu. Good. Extent, 648 granthas.

प्रश्नसङ्ग्रहः by जम्बूनाथः ।

PRAŚNASAṄGRAHAḤ by Jambūnātha.

Begins on fol. 18 *a* of the MS. described under D. No. 13844. Incomplete.

A work on astrological predictions, explaining the rules for the same.

Beginning :

वाधूलश्शोलभूर्नत्वा जम्बूनाथो महेश्वरम् ।
मासाब्दाहःफलोक्त्यर्थं कुर्वे भावार्थसङ्ग्रहम् ॥
नीचे तदंशे वाक्याद्वारूढेऽर्के खवासरे ।
प्रश्नश्चेदचिरान्मृत्युरन्यथा दीर्घजीवितम ॥
प्रष्टुर्लग्नादिभावैश्च ग्रहयोगेक्षणादिभिः ।
मासाब्दाहःफलं वक्ष्ये बलाबलवशादहम् ॥
लग्ने पापे देहपीडा सुखे पापे सुखक्षयः ।
बन्धुनाशः स्थानहानिर्धर्महानिर्गुरोर्विपत् ॥

॥ मेषस्थरविफलम् ॥

अल्पार्थलाभशास्त्राप्तिरटनं मेषगे रवौ ।
राजवार्ताश्रुतिर्भूपप्रीतिर्वन्यपदार्थभाक् ॥

Colophon :

इति श्रीप्रश्नसंग्रहे नित्यदशाफलनिरूपणं सम्पूर्णम् ।

Colophon :

इति केरलीयनित्यदशायां संवत्सरफलकथनं समाप्तम् ।

End :

अथोक्तदशादीनां पञ्चाङ्गस्थनक्षत्रनाडीभ्यः साधने किंचित्स्थूलता भवतीति तत्सौक्ष्म्यार्थमुपायमेकेनाह —

खाभ्राभ्राष्टकृतान्भजेत्स्वसमयस्पष्टेन्दुगत्या फलं
सर्वर्क्षे घटिकादिकं स्फुटविधोर्लिप्ताः खखाष्टोद्धृताः ।
अश्विन्यादिगतं भमभ्ररसनिघ्नं शिष्टमाप्तं तया
नाड्याद्यं गतमिष्टभे तत इदं सर्वं दशाद्यानयेत् ॥

D. No. 17205

Pages, 57. Lines, 5 on a page. Telugu. Injured. Extent, 570 granthas.

सात्वतसंहिता ।

SĀTVATASAMHITĀ.

Begins on fol. 1*a* of the MS. described under D.No. 10005.

Contains the 17th and 18th paricchedas. Wants beginning and end.

Similar to the work described under R. No. 3257.

Beginning :

. . . . . होमं सिद्धार्थकैस्तिलैः ।
मूलमन्त्रेण सास्त्रेण शता . . . . कसंख्यया ॥
अमुकं रक्षरक्षेति स्वाहाशब्दसमन्वितम् ।
मन्त्रान्ते कपदं कुर्याद्भ्रामयेन्मूर्ध्नि चाहुतिम् ॥

Colophon :

इति पाञ्चरात्रे सात्वतसंहितायां वैभवीयनृसिंहकल्पे सप्तदशः परिच्छेदः ।

End :

ओदनं दधिलाजाख्यमधुतोयपरिप्लुतम् ।
भूततर्पणमित्युक्तं तद्दिना तत्र तेऽनिशम् ॥

D. No. 17206

Pages, 34. Lines, 5-7 on a page. Telugu and Grantha. Injured. Extent, 370 granthas.

दुर्वासःसंहिता ।

DURVĀSASSAMHITĀ.

Begins on fol. 30*a* of the MS. described under D. No. 10005.

Contains Adhyāyās 26, 27 and 28 complete and 29 incomplete.

A work relating to the Pāñcarātra Āgama of the Śrī Vaishnavas purporting to have been expounded by the sage Durvāsas.

Beginning :

दुर्वासःसंहितायां सुदर्शननृसिंह्मकल्पः ।

अगस्त्य उवाच—

भगवन्मुनिशार्दूल शत्रुपीडाविधिं मम ।
तत्सर्वं विस्तरेणैव मह्यं ब्रूहि महामते ॥

दूर्वासा उवाच—

साधु साधु माहाभाग प्रश्नं गुह्यतमं परम् ।
धर्मार्थकाममोक्षाणां कर्ता नारायणो हरिः ॥
तस्य देवस्य जगति मूर्तिरासीन्नृसिंह्मिका ।
भक्तानां विजिगीषूणां जयाय सकलेश्वरी ॥
एकविंशतिभेदेन तस्य पूजां विधिक्रमात् ।
पठिनो मूर्तिभेदश्च तन्त्रेऽस्मिन्शार्ङ्गधन्विना(?) ॥

Colophon :

इति पाञ्चरात्रे दुर्वासस्संहितायां श्रीसुदर्शननारसिंहविधाने षड्विंशोऽध्यायः ।

Colophon :

इति श्रीपाञ्चरात्रे दुर्वासस्संहितायां सुदर्शननारसिंह्मविधानं नामाष्टाविंशोऽध्यायः ।

End :

एवं संश्चिन्त्य कपलं हृदये मतिमान्नरः ।
तत्रैव पूजां कृत्वैव गन्धपुष्पैरलङ्कृतम् ।
मनसा कारयेद्धोमं नादिभिर्भिर्वुधम् (?) ।
प्राणायामत्रयं कुर्यात् । ओं सहस्रार हुंफट् ॥

D. No. 17207

Pages, 23. Lines, 5 on a page. Grantha. Injured. Extent, 184 granthas.

शाण्डिल्यसंहिता ।

ŚĀṆḌILYASAMHITĀ.

Begins on fol. 47 *a* of the MS. described under D. No. 10005.
Contains the Devavākyavidhi in Utsavādhikaraṇa.

A work similar to the above.

Beginning :

शाण्डिल्यः —

भगवन्देवदेवेश लोकानुग्रहकारक ।
विष्वक्सेनार्चनं ब्रूहि साधकानां हिताय वै ॥

श्रीभगवानुवाच —

विष्वक्सेनार्चनं वक्ष्ये सर्वधर्मार्थसिद्धिदम् ।
क्रमाच्छृणु मुनिश्रेष्ठ त्रिविधं तस्य पूजनम् ॥
गुरुपंक्त्यर्चने त्वेकं तदायं च विशेषतः ।
सान्तस्थपरिवाराणामर्चने च तथैव च ।
विसर्जनं च देवस्य गणनाथं यजेद्बुधः ।
स्नानाद्यमालये कार्यं साङ्गोपाङ्गसमन्वितम् ॥
यजनं विहितं तत्र गणनाथं सपीठकम् ।

End :

अनुक्तमन्यतो ग्राह्यं ब्रूयाद्राजोपचारवत् ।
अज्ञानाद् ज्ञानतो वापि न किंचिदनृतं वदेत् ॥
मोहेन चानृतं ब्रूयाद्देवदेवस्य सन्निधौ ।
मेषयोनिशतं गच्छेत्तदन्ते मूकतां व्रजेत् ॥
तस्मात्सर्वप्रयत्नेन नानृतं श्रावयेद्बुधः ।

Colophon :

इति श्रीपाञ्चरात्रे शाण्डिल्यसंहितायामुत्सवाधिकरणे देववाक्यविधिः समाप्तः ।

D. No. 17208

Pages, 5. Lines, 4 in a page. Grantha. Injured. Extent, 25 granthas.

सुदर्शनहोमः ।

SUDARŚANAHOMAḤ.

Begins on fol. 74*a* of the MS. described under D. No. 10005.

Similar to the work described under D. No. 3855.

Incomplete.

Beginning :

ओं सहस्रार हुं फट् स्वाहा । सुदर्शनाय हेतिराजायेदं न मम । पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न-तदामोऽश्नुते । श्रिता स इद्वहन्तस्तत्समासत स्वाहा । सुदर्शनायेदं न मम ।

End :

ओं नमो भगवते वासुदेवाय स्वाहा । पुरुषसूक्तम् । श्रीसूक्तम् । तण्डुलं परिकल्प्य, चतुश्रकं मूलमन्त्रेणाष्टोत्तरशतं, श्रीभगवदाज्ञा । ऊर्ध्वपुण्ड्रसंस्कारं करिष्ये ।

D. No. 17209

Pages, 7. Lines, 5 on a page. Grantha. Injured. Extent, 35 granthas.

आधारशक्तिहोमः ।

ĀDHĀRAŚAKTIHOMAḤ.

Begins on fol. 77*a* of the MS. described under D. No. 10005.

Incomplete.

Beginning :

ओं आधारशक्त्यै स्वाहा । आधारशक्त्यै स्वाहा । आधारशक्त्यै इदं न मम । प्रकृत्यै स्वाहा — मम । अखिलजगदाधारकूर्मरूपिणे नारायणाय स्वाहा — मम । श्रीवैकुण्ठाय दिव्यलोकाय स्वाहा । मम ।

End :

मूलमन्त्रेणाष्टोत्तरं हुत्वा द्वयेन चरमश्लोकेन प्रत्येकं प्रत्येकमष्टाहुती-र्जुहुयात् । द्वादशाक्षरविष्णुषडक्षररामतारककृष्णतारकप्रत्येकप्रत्येकं द्वाद-शवारं हुत्वा . . . . ।

D. No. 17210

Palm leaf. 14¾ × 1¼ inches. Pages, 52. Lines, 5 on a page. Telugu. Injured. Old. Extent, 500 granthas.

अनन्तव्रतोद्यापनकल्पः ।

ANANTAVRATODYĀPANAKALPAḤ.

Same work as that described under D. No. 8168.

Complete.

Contains Pūjāvidhāna and kathā.

D. No. 17211

Pages, 52. Lines, 6 on a page. Kannaḍa. Slightly injured. Extent, 624 granthas.

अर्जुनपुरीमाहात्म्यम् ।

ARJUNAPURĪMĀHĀTMYAM.

Begins on fol. 1*a* of the MS. described under D. No. 9934.

Contains 1 to 12 Adhyāyās.

Complete.

On the greatness of Arjunapurī.

Beginning :

क्रोधादुद्भूतनासास्फुटसुषिरयुगध्मातनिर्घातभूभृ-
त्सङ्घातस्तम्भजात्यस्फुरदधरदलस्तीक्ष्णदंष्ट्राकरालः ।
दिक्षु प्रक्षिप्तचक्षुः क्षितिभरभरभृत्प्राप्तिपक्ष्यं दिदृक्षू
रक्षोवक्षःक्षतासृक्स्नापितनखमुखः पातु मां श्रीनृसिंहः ॥
वेदव्यासं हरेर्दासं हंसं श्रीहरिशंसिनम् ।
अष्टादशपुराणानां कर्तारमहमाश्रये ॥
सुरासुरशिरोरत्नं मौलिरत्नप्रभारुणम् ।
श्रीमदर्जुनपुरीशाननारसिंहस्य शासन(?)म् ॥
कदाचित्पूर्वसमये तपस्यन्तं महामुनिम् ।
अभिवादयितुं सर्वे मुनयः समुपागमन् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे अर्जुनपुरीमाहात्म्ये अगस्त्यगौतमसंवादे प्रथमोऽध्यायः ।

* * * *

ब्रह्मणा स्थापितः पूर्वं कदम्बस्याश्रमे शुभे ।
ऋषिणाराधितः सम्यक्कदम्बेन महात्मना ॥

लब्धराज्याः कृतार्थाश्च सकृष्णाः पाण्डुनन्दनाः ।
सुखमावसन्तस्तत्र स्वराज्ये जितशत्रवः (?) ॥
एतस्मिन्नन्तरे तेषु कौन्तेयेषु (तु) पञ्चसु ।
कदाचिदर्जुनः कृष्णं स्तोत्रं कर्तुं समुद्यतः ॥

* * *

इत्येवमर्जुनेनोक्तः प्रहसन्वाक्यमब्रवीत ।
आविर्भावान्मदीयांश्च कुत्र द्रक्ष्यसि फाल्गुन ॥
तथापि कृपया तुभ्यं वक्ष्यामि भरतर्षभ ।
वैकुण्ठे पद्महस्तायै दर्शितं भीमदर्शनम् ॥
नरसिंहावतारं च शत्रुपक्षविनाशकम् ।
पुनर्लक्ष्मीनियोगाच्च विधातृतपसा भुवि ।
कदम्बस्याश्रमे रम्ये अवतारं कृतं मया ।
इत्युक्तस्तेन कृष्णेन फल्गुनः प्रत्युवाच तम् ॥
अद्य सेवितुमिच्छामि नरकेसरिणं भुवि ।
इत्युक्त्वा भ्रातृभिः सार्धं प्रतस्थे पाण्डुनन्दनः ॥
दामोदरं पुरस्कृत्य कदम्बाश्रममाययौ ।
नरपञ्चाननं दृष्ट्वा प्रणम्य विधिवत्प्रभुम् ॥
नरसिंहनखाग्रेण विदारितरिपूदरम् ।
वामदक्षिणपार्श्वस्थताक्ष्र्यप्रह्लादसेवितम् ॥

* * * *

पद्मतीर्थं ब्रह्मतीर्थमृषितीर्थं ततः परम् ।
पश्चात्प्रह्लादतीर्थं च तीर्थमानन्दमेव च ॥
नारसिंहं ततः पश्चात्संसारदुरितापहम् ।
यादवं पाण्डवं चेति ह्यष्टतीर्थानि भारत ॥

* * * *

अत्र त्वमपि लक्ष्मीश नरसिंहस्य सन्निधौ ।
सान्निध्यं च सुहृत्स्नेहात्कर्तव्यं कमलालय ॥
अर्चारूपिणमानन्दजनकं जगतां सदा ।
कृष्णं संस्थाप्य विधिवत्कृतकृत्योऽभवत्ततः ॥

* * * *

तदाप्रभृत्यर्जुनेन अभिमानितनित्यदा(?) ।
अस्यार्जुनपुरं श्रीमदिति सन्तः प्रचक्षते ॥

Colophon :

इति श्रीब्रह्माण्डपुराणेऽर्जुनपुरीमाहात्म्येऽगस्त्यगौतमसंवादे
एकादशोऽध्यायः ।

End :

यो नारदाच्छ्रुतघटोद्भववक्त्रसूक्त-
माहात्म्यमस्य नृहरेः पठति शृणोति ।
सो(?) पुत्रजाद्यखिलसम्पदवाप्तकामः
सायुज्यमेति नरकेसरिणः प्रभावात् ॥

Colophon :

। इति ब्रह्माण्डपुराणेऽगस्त्यगौतमसंवादे श्रीमदर्जुनपुरीमाहात्म्ये
द्वादशोऽध्यायः ।

D. No. 17212

Palm leaf. 11 × 1½ inches. Pages, 32. Lines, 6 on a page. Nandinágari. Injured. Old. Extent, 200 granthas.

सोमवत्यमावास्याव्रतकल्पः ।

SOMAVATYAMĀVĀSYĀVRATAKALPḤ.

Begins on fol. 1*a*. The other works herein are :—

Somavāravratakalpaḥ 17 (*a*), Vināyakavratakalpaḥ 29 (*a*), Yamunāpūjā 39 (*a*), Anantapadmanābhavratam 43 (*a*), Śivarātrivratakalpaḥ 57(*b*), Śravaṇadvādaśīvratakalpaḥ 64 (*a*), Rāmāyaṇavyākhyā Vālmīkihṛdaya 95 (*a*).

Same work as that described under D. No. 8195 wherein this work has been mentioned as " Amāsomavāravratakalpaḥ. "

Complete as given in the Bhaviṣyottarapurāṇa.

D. No. 17213

Pages, 24. Lines, 5 on a page. Nandinágari. Injured. Extent, 150 granthas.

सोमवारव्रतकल्पः ।

SOMAVĀRAVRATAKALPAḤ.

Begins on fol. 17*a* of the MS. described under previous number.

Same work as that described under D. No. 8577.

Complete. From Skāndapurāṇa.

D. No. 17214

Pages, 20. Lines, 6 on a page. Nandināgari. Injured. Extent, 150 granthas.

विनायकव्रतकल्पः ।

VINĀYAKAVRATAKALPAḤ.

Begins on fol. 29 *a* of the MS. described under D. No. 17212.

Same work as that described under D. No. 8499.

Wants beginning otherwise complete. From Skāndapurāṇa.

D. No. 17215

Pages, 9. Lines, 6 on a page. Nandināgari. Injured. Extent, 80 granthas.

यमुनापूजा ।

YAMUNĀPŪJĀ.

Begins on fol. 39*a* of the MS. described under D. No. 17212.

Same work as that described under D. No. 8425.

Complete.

On the worship of river-goddess Yamunā as a preliminary rite to the observance of Anantavrata.

D. No. 17216

Pages, 28. Lines, 5 on a page. Nandināgari. Injured. Extent, 200 granthas.

अनन्तपद्मनाभव्रतकल्पः ।

ANANTAPADMANĀBHAVRATAKALPAḤ.

Begins on fol. 43*a* of the MS. described under D. No. 17212.

Same work as that described under D. No. 8179.

Complete as given in the Bhaviṣyottarapurāṇa.

D. No. 17217

Pages, 12. Lines, 6 on a page. Nandināgari. Injured. Extent, 112 granthas.

शिवरात्रिव्रतकल्पः ।

ŚIVARĀTRIVRATAKALPAḤ.

Begins on fol. 57*b* of the MS. described under D. No. 17212.

Same work as that described under D. No. 8537.

Complete. From Skāndapurāṇa.

Fol. 63*b* is left blank.

D. No. 17218

Pages, 58. Lines, 5 on a page. Nandināgari. Injured. Extent, 326 granthas.

श्रवणद्वादशीव्रतकल्पः ।

ŚRAVAṆADVĀDAŚĪVRATAKALPAḤ.

Begins on fol. 64 *a* of the MS. described under D. No. 17212.

Similar to the work described under D. No. 8552.

Complete. From Brahmakaivartapurāṇa.

Beginning :

युधिष्ठिर उवाच—

कृष्ण कृष्ण महायोगिन्वदतां वर माधव ।
केनोपायेन मुक्तिः स्यान्मानुषाणां महीभुवाम् ॥
संसारात्तापनिलयात्कृपया वक्तुमर्हसि ।

कृष्ण उवाच—

अथातः सम्प्रवक्ष्यामि श्रवणद्वादशीव्रतम् ।
मासि भाद्रपदे शुक्लद्वादशीश्रवणान्विते ॥

End :

य इदं शृणुयाद्भक्त्या श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीब्रह्मकैवर्ते वामनजयन्तीव्रतं समाप्तम् ।

Foll. 90 to 92-b contain Śivapūjāvidhi (Somavāravrata).

D. No. 17219

Pages, 50. Lines, 7 on a page. Nandināgari. Injured. Extent, 525 granthas.

रामायणव्याख्या—वाल्मीकिहृदयम् by वेङ्कटाद्रि ।

RĀMĀYAṆAVYĀKHYĀ—VĀLMĪKIHṚDAYAM by Veṅkaṭādri.

Begins on fol. 95*a* of the MS. described under D. No. 17212.

Same work as that described under R. No. 4821 which contains from Ayodhyākāṇḍa onward.

Contains second sarga only in Bālakāṇḍa.

Beginning :

प्रबन्धकरणाय यावत्प्रबन्धप्रतिपाद्यप्रधानवस्तुसूचनपरा सत्यसरस्वतीयं प्रवृत्तेति "मच्छन्दादेव ते ब्रह्मन्प्रवृत्तेयं सरस्वती" इति ब्रह्मवचनेन स्पष्टम् । तादृशतत्त्वार्थस्तु ह मानिषाद लक्ष्मीनिवास, निषीदत्यस्मिन्निति निषादो निवासः । अधिकरणार्थे घञ्प्रत्ययः । षद्धातोर्गत्यर्थत्वं प्रकृते- (?) स्मातयाणि ण्यन्त धा .... निषादः । निवासेति तदर्थला- भात् ।

यद्वा छान्दसे षत्वे विवक्षिते मानिनः प्रमाणवन्तः । मानस्य च प्रमायोगव्यवच्छिन्नत्वरूपेण ज्ञानिन इति लभ्यते । तेषां सादोऽनुग्रहो गतिर्वा यस्मात् ।

End :

तथा च समानि मधुराणि उपनतार्थानि च तानि वाक्यानि । तैर्बद्धं रघुवरचरितं रामायणकाव्यं मुनिप्रणीतमार्षमित्यर्थः । रघुवरचरितं किंविषयमित्यपेक्षायामाह— दशशिरसश्चेति ।

Colophon :

। इति बालकाण्डे द्वितीयः सर्गः ।

भारद्वाजकुलोद्भूतो वेङ्कटाद्रिविचक्षणः ।

व्याख्यां रामायणस्यस्योचे वाल्मीकिहृदयाभिधाम् ॥

इति भरद्वाजकुलतिलकवेङ्कटाद्रिसुधीकृते वाल्मीकिहृदये रामायणव्याख्याने द्वितियः सर्गः ।

- Foll. 116*a* to 117*b* contain Rāmāyaṇavyākhyā Maheśvaratīrthīya
  Fol. 118 contains Rāmāyaṇavyākhyā Īśvaradīkṣitiyā.
  Fol. 119 contains Rāmāyaṇavyākhyā Govindarājīyā.
  Foll. 93 and 94 contain only the 2nd sarga in Bālakāṇḍa of Rāmāyaṇa.

D. No. 17220

Palm leaf. 17¾ × 1½ inches. Pages, 57. Lines, 6 on a page. Grantha. Much injured. Old. Extent, 640 granthas.

सुबालोपनिषद्भाष्यम् by सुदर्शनाचार्य ।

SUBĀLOPANIṢADBHĀṢYAM by Sudarśanācārya.

Same work as that described under D. No. 830.

Complete in five khaṇḍās.

It is in accordance with the Viśiṣṭādvaita school.

D. No. 17221

Palm leaf. 14 × 1½ inches. Pages, 22. Lines, 7 on a page. Grantha. Injured. Old. Extent, 200 granthas.

द्राविडाम्नायसङ्गतिः by अभिरामवर ।

DRĀVIḌĀMNĀYASAṄGATIḤ by Abhirāmavara.

Same work as that described under D. No. 5261 with the addition of the following colophon :—

। इति द्राविडवेदसङ्गतिश्लोकाः सम्पूर्णाः ।
द्राविडाम्नायसङ्गत्या तदर्थं ज्ञानिहृद्गतम् ॥
कलयन्तं भजे वादिसिंहं वरवरं मुनिम् ॥

This work is also called " Dramiḍopaniṣattātparya ".

D. No. 17222

Pages, 24. Lines, 8 on a page. Grantha. Good. Extent, 180 granthas.

नारायणशब्दार्थविचारः ।

NĀRĀYAṆAŚABDĀRTHAVICĀRAḤ.

Begins on fol. 1*a* of the MS. described under D. No. 10224.

Similar to the work described under R. No. 1323 (*e*).

Incomplete.

Deals with the etymology and meaning of word Nārāyaṇa from the Vaiṣṇava standpoint.

Beginning :

हंसो रघुकुलोत्तंसः सदा मम हृदम्बुजम् ।
प्रमोदभरितं कुर्यान्निजालोकैर्विकासयन् ॥

नारायणशब्दः शिवपरो नवेति विप्रतिपत्तिः । भवतीति पूर्वपक्षिणः । न भवतीति सिद्धान्तिनः । ननु किमिदं नाप शिवपरत्वम् । न तावच्छिवप्रतीतीच्छया उच्चरितत्वम् ।

End :

तथापि स्वावृत्तिपदत्वासमानाधिकरणपदत्ववत्वस्यैव समीचीनतया स्वावृत्तिपदत्वे नकारवृत्तित्वविशेषणवैयर्थ्यात्स्ववृत्तिपदत्वानाश्रयत्वस्यैव प्रागुक्तस्य निवेशसम्भवेनोक्ताखण्डपदत्वनिवेशे गौरवात् ।

D. No. 17223

Pages, 8. Lines, 6 on a page. Grantha. Good. Extent, 63 granthas.

गुणाधिकरणवादः ।

GUṆĀDHIKARAṆAVĀDAḤ.

Begins on fol. 13 *a* of the MS. described under D. No. 10224.

A tract relating to the Pūrva Mīmāṁsā and discussing the Guṇādhikaraṇa.

Beginning :

उक्तं हि गुणाधिकरणे "तप्ते पयसि दध्यानयति सा वैश्वदेव्या-मिक्षा" इत्यामिक्षाद्रव्यकं यागं विधाय श्रुते वाजिभ्यो वाजिनमिति वाक्ये किं पूर्वस्मिन्नेव कर्मणि वाजिनरूपगुणान्तरविधानं किं वा तद्द्रव्यक यागान्तरविधानमिति संशये यद्यपि गुणविशिष्टमेव कर्म पूर्ववाक्ये प्रतिपन्नम् ।

End :

न चात्र प्राकृताङ्गन्यायो युक्तः तत्र प्रकृतिवदतिदेशेनाखण्डोपकार वैशिष्ट्येन विकृतिदेशं प्राप्तानां तेषां स्वतो वान्याकाङ्क्षया वा वैकृतो पकारानुकूलाकाङ्क्षा कल्प्यत इति । इह तु कर्मणः स्व . . . . ।

D. No. 17224

Palm leaf. 10½ × 1½ inches. Pages, 18. Lines, 7 on a page. Telugu. Good. New. Extent, 210 granthas.

सुदर्शनकल्पसारसमुच्चयः ।

SUDARŚANAKALPASĀRASAMUCCAYAḤ.

Same work as that described under R. No. 79.

Contains Adhyāyās 1 to 9 complete, 10th incomplete.

D. No. 17225

Palm leaf. 14½ × 1½ inches. Pages, 29. Lines, 10 on a page. Grantha. Good. Old. Extent, 464 granthas.

बदरीवनमाहात्म्यम् ।

BADARĪVANAMĀHĀTMYAM.

Same work as that described under R. No. 4533 (*a*).

Contains the Adhyāyās 1—10, as found in the Uttarabhāga of the Sanatkumārasaṁhitā of the Skāndapurāṇa.

D. No. 17226

Palm leaf. 15¼ × 1½ inches. Pages, 30. Lines, 7 on a page. Grantha. Injured. Old. Extent, 480 granthas.

यन्त्रचिन्तामणिः ।

YANTRACINTĀMAṆIḤ.

Same work as that described under D. No. 8038.

Contains Vaśyādhikāra incomplete. As this is injured and as the leaves are not properly arranged the portion herein cannot be well identified. The work is said to have been compiled by Dāmodara.

D. No. 17227

Palm leaf. 11 × 1¾ inches. Pages, 9. Lines, 8 on a page. Grantha, Good. Old. Extent, 108 granthas.

आत्मतत्त्वविवेकः by उदयनाचार्य ।

ĀTMATATTVAVIVEKAḤ by Udayanācārya.

Begins on fol. 1*a*. The other works herein are :—Ātmatattvavivekadīdhitiḥ 6 (*a*), Ātmatattvavivekadīdhitivyākhyā 13 (*a*), Śabdaśaktiprakāśikā 60 (*a*).

This work is also called " Bauddhadhikkāra ".

This work belongs to the Nyāya system. The author wrote the Ātmatattvaviveka in defence of the permanent " Soul-theory." It is divided into four paricchedās. In the first pariccheda the author has tried to refute the theory of the momentariness of the world. In the second pariccheda he has examined the subjectivism of the idealists. In the third pariccheda he discussed the theory of non-existence of a substance apart from its qualities. In the fourth pariccheda he has attacked the theory of the non-existence of things in this world. It is here that he gives his arguments to prove the existence of God and the individual self.

Breaks off in the kṣaṇabhaṅgavāda in the first pariccheda.

Beginning :

स्वाम्यं यस्य निजं जगत्सु जनितेष्वादौ ततः पालनं
व्युत्पत्तेः करणं हिताहितविधिव्यासेधसम्भावनम् ।
भूतोक्तिः सहजा कृपा निरुपधिर्यत्नस्तदर्थात्मक-
स्तस्मै पूर्वगुरूत्तमाय जगतामीशाय पित्रे नमः ॥

इह खलु निसर्गप्रतिकूलस्वभावं सर्वजनसंवेदनसिद्धं दुःखं जिहासवः सर्व एव तद्धानोपायमविद्वांसोऽनुसरन्तश्च सर्वाध्यात्मविदेकवाक्यतया तत्त्वज्ञानमेव तदुपायमाकर्णयन्ति । न ततोऽन्यत् । प्रतियोग्यनुयोगितया चात्मैव तत्त्वतो ज्ञेयः ।

End :

विपर्यये बाधकं विशेष इति चेन्न । तस्येहापि सत्त्वात् । तद्भावे स्वभावत्वानुपपत्तेः । उपपत्तौ वा किं बाधकानुसरणव्यसनेनेति विशेषस्य विशेषं प्रति प्रयोजकत्वाच्च ।

D. No. 17228

Pages, 14. Lines, 8 on a page. Grantha. Good. Extent, 168 granthas.

आत्मतत्त्वविवेकदीधितिः by रघुनाथशिरोमणि ।

ĀTMATATTVAVIVEKADĪDHITIḤ by Raghunāthaśiromaṇi.

Begins on fol. 6*a* of the MS. described under previous number.

This is a commentary on Udayana's Ātmatattvaviveka.

Breaks off in the kṣaṇabhaṅguravāda in the first paricchoda.

This work is otherwise known as " Bauddhadhikkāradīdhiti ".

Beginning :

ओं नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
निर्णीय सारं शास्त्राणां तार्किकाणां शिरोमणिः ।
आत्मतत्त्वविवेकस्य भावमुद्भावयत्ययम् ॥

शिष्टाचारपरम्परापरिप्राप्ताभिमतकर्मारम्भसमयकर्तव्यताकं कृतमिष्टदेवता-नमस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति स्वाम्यमित्यादिना ।

End :

बीजमङ्कुरं करोतीति बुद्धेश्च फलोपहितं स्वरूपं फलाव्यवहितप्राक्काल-वृत्तिस्वरूपं वा विषयो न तु कुर्वद्रूपत्वामिति । लिङ्गाभावादिति । साध्याप्रसिद्ध्या व्याप्त्यग्रहेण लिङ्गत्वायोगादिति । तज्जातीयत्वाविशेषेऽपि करणाकरणेन . . . . . . ।

D. No. 17229

Pages, 94. Lines, 8 on a page. Grantha. Good. Extent, 1,316 granthas.

आत्मतत्त्वविवेकदीधितिव्याख्या by गदाधर ।

ĀTMATATTVAVIVEKADĪDHITIVYĀKHYĀ by Gadādhara.

Begins on fol. 13*a* of the MS. described under D. No. 17227.

Contains Kṣaṇabhaṅgavāda incomplete.

This is a commentary on Ātmatattvavivekadīdhiti of Raghunātha-śiromaṇi.

Beginning :

श्रीकृष्णचरणद्वन्द्वमाराध्य श्रीगदाधरः ।
बौद्धधिकारविवृतिं व्याकरोति शिरोमणेः ॥

आत्मतत्त्वविवेकग्रन्थारम्भसमये ग्रन्थकृतमाचार्याणामीश्वरनमस्करणस्य ग्रन्थादौ स्वाम्यमित्यादिपद्येन तदुपनिबन्धनस्य च फलं दर्शयति शिष्टेति ।

End :

अन्येषां विप्रतिपत्त्यन्तरं दूषयति बीजवृत्तीति । निषेधकोटिः परेषामतीन्द्रियमनआदौ जातित्वस्य प्रत्यक्षत्वव्यभिचारितया विधौ बाधवारणाय बीजवृत्तीति । विप्रतिपत्त्यन्तर्गतप्रत्यक्षत्वं प्रत्यक्षविषयत्व पक्षस्य प्रत्यक्षविषयबीजत्वादिसाधारणतया विधौ सिद्धसाधनवारणाय सामान्य . . . . . . ।

D. No. 17230

Pages, 63. Lines, 8 on a page. Grantha. Good. Extent, 882 granthas.

शब्दशक्तिप्रकाशिका by जगदीश ।

ŚABDAŚAKTIPRAKĀŚIKĀ by Jagadīśa.

Begins on fol. 60*a* of the MS. described under D. No. 17227.

Same work as that described under R. No. 410 (*d*).

Breaks off in Karmadhārayaprakaraṇa.

D. No. 17231

Palm leaf. 13¾ × 1½ inches. Pages, 6. Lines, 7 on a page. Kannada. Injured, Extent, 36 granthas.

वेङ्कटेशकवचः ।

VEṄKAṬEŚAKAVACAḤ.

Begins on fol. 1*a*. The other works herein are :—Veṅkaṭeśadvādaśanāmastotram 4 (*a*), Viṣṇukavacam 6 (*a*), Hanumanmālāmantraḥ 7 (*a*), Divyadeśamaṅgalāśāsanam 11 (*a*) (Tamil), Jaiminibhāratam 36 (*a*) (Kannaḍa).

Similar to the work described under R. No. 5917 (*c*).

Complete.

Beginning :

अस्य श्रीवेङ्कटेशदिव्यकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः (शिरसि)। अनुष्टुप् छन्दः (मुखे)। परमात्मा श्रीवेङ्कटेशो देवता (हृदये)। नीलगोक्षीरसम्भूः इति बीजम् (नाभौ)। श्रीनिवास इति शक्तिः (गुह्ये)। वेङ्कटेशोऽधिपतिरिति कीलकम् (पादयोः) मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः। इति सर्वाङ्गे।

* * * *

ध्यानम् —

भूमिप्रदं भूषणभूषिताङ्गं श्रिया समेतं शिवशक्ति . . . ।
. . . . संश्रितपारिजातं श्रीवेङ्कटेशं मनसा स्मरामि ॥

* * * *

इत्येतत्कवचं पुण्यं पवित्रं पापनाशनम् ।
नरसिंहकृतस्तोत्रं सर्वारिष्टप्रशान्तये ।

End :

सर्वान्व्याधीन्नीक्षणेन भिन्धि भिन्धि। छिन्धि छिन्धि। नाशय नाशय। निकृन्तय निकृन्तय। भेदय भेदय। खेदय खेदय महावीर। श्रीवेङ्कटेश्वरस्मरणम्।

D. No. 17232

Pages, 7. Lines, 5 on a page. Kannaḍa. Injured. Extent, 60 granthas.

हनुमन्मालामन्त्रः ।

HANUMANMĀLĀMANTRAḤ.

* Begins on fol. 7*a* of the MS. described under previous number.
Similar to the work described under D. No. 7678.
Incomplete. Wants beginning.

Beginning :

. . . . . स्त्राय फट्। भूर्भुवः सुवरोमिति दिग्बन्धः।

ध्यानम्—

श्रीमत्कैलासशिखरप्रतिनिधिनिवहश्रीकरोदारगात्रं
जैत्रं रक्षःपिशाचग्रहगणनिधनं देवकार्याग्रगण्यम्।
गण्यं नागप्रवीणं प्रबलजयमिदं(?)श्रीविशालाभिरामं
नामानन्दस्वरूपं पवनजमनिशं संश्रये हृत्सरोजे ॥

End :

सर्वान् जिह्वान् छेदय छेदय। शोषय शोषय । बन्धय बन्धय । मम रक्षां कुरु। क्ष्रां क्ष्रीं क्ष्रूं क्ष्रैं क्ष्रौं क्ष्रः । हुं फट् स्वाहा । श्रीसत्पञ्चवक्त्रहनुमते नमः ।

Colophon :

मालामन्त्रं(न्त्रः) सम्पूर्णम(:) ।

D. No. 17233

Palm leaf. 15½ × 1¼ inches. Pages, 49. Lines, 6 on a page. Telugu. Injured. Old. Extent, 440 granthas.

वैद्यग्रन्थः ।

VAIDYAGRANTHAḤ.

Begins on fol. 1*a*. The other work herein is :—Vaidyaviṣayālu 26 (*a*) (Telugu).

Similar to the work described under D. No. 13218.

Deals with the description of maladies and their treatment.

Colophon :

रोगोत्पत्तिर्द्विविधा । स्वतन्त्रा परतन्त्रा । स्वतन्त्रा नाम । स्वतन्त्ररोगो द्विविधः । निज आगन्तुकः । निजं नाम विरुद्धाशन . . . . . अकालभोजनातिमूत्रामूत्राविधिभोजनऋतुविरुद्धाशनमातृज-पितृजसहजगर्भोपचार . . तादिरोगा एकादश ।

End :

हिङ्गुलं च . . . . . व्योष टङ्कणं गन्धकं समम् ।
मातुलुङ्गाम्लसारेण पेषयेद्याममात्रकम् ॥
. . . . . मात्रं प्रकुर्वीत वटकां सम्प्रयोजयेत् ।
कासश्वासक्षयगुल्मप्रमेहविषभञ्जकम् ॥

सर्पवृश्चिकदष्टो वा श्लेष्ममन्दाग्निपीनसे ।
प्रयोगान्नाशयेत्सर्वं रसमानन्दभैरवम् ॥

D. No. 17234

Palm leaf. 18 × $1\frac{5}{8}$ inches. Pages, 194. Lines, 10 on a page. Telugu. Injured. Old. Extent, 3,880 granthas.

प्रमाणसंग्रहः by सौम्यजामातृमुनेः ।

PRAMĀṆASAṀGRAHAḤ by Saumyajāmātṛmuni.

Same work as that described under R. No. 4561 with slight difference. Complete.

D. No. 17235

Palm leaf. 18 × $1\frac{1}{2}$ inches. Pages, 35. Lines, 7 on a page. Telugu. Slightly injured. Old. Extent, 630 granthas.

अतिमानुषस्तवः सव्याख्यः by श्रीवत्साङ्कमिश्र ।

ATIMĀNUṢASTAVA with commentary by Śrīvatsāṅkamiśra.

Begins on fol. 1*a*. The other works herein are :—Varadarājastava with commentary 19 (*a*). Sundarabāhustava with commentary 45 (*a*).

Same work as that described under R. No. 4006 (*b*). Wants two stanzas in the beginning. Otherwise complete.

The author of this commentary is "Śrīnivāsācārya" (?).

This text as well as the commentary has been printed along with other four stotras under the title of "Pañcastavi" with commentary.

D. No. 17236.

Pages, 52. Lines, 7 on a page. Telugu. Slightly injured. Extent, 884 granthas.

वरदराजस्तवः सव्याख्यः by श्रीवत्साङ्कमिश्र ।

VARADARĀJASTAVA with commentary by Śrivatsāṅkamiśra.

Begins on fol. 19 *a* of the MS. described under D. No. 17235.

Same work as that described under D. No. 10532 wherein see for beginning.

The commentator's name is not found in this MS. but the name is given here according to the printed book found in our Library.

Complete. The author of this commentary is Śrinivāsācārya.

End :

स तु नाथमुनिश्च पराङ्कुशमुनेर्वंश्यः विद्यावंश्यः । सोऽपीति । पराङ्कुशमुनिरपि तव देव्याः सर्वजनजनन्याः " देव्या कारुण्यरूपया " इत्युक्तायाः श्रियो दास इति हेतोरीक्षणीयोऽस्मि । भवदीयदयारूपायाः

श्रियो देव्याः परम्परासम्बन्धवद्रामानुजाङ्घ्रिशरणोऽस्मि । ततो हेतोः कटाक्षणीयोऽस्मीति निष्कृष्टोऽर्थः ।

Colophon :

श्रीवरदराजस्तवः समाप्तः ।

D. No. 17237.

Pages, 28. Lines, 7 on a page. Telugu. Slightly injured. Extent, 490 granthas.

सुन्दरबाहुस्तवः सव्याख्यः by श्रीवत्साङ्कमिश्रः ।

SUNDARABĀHUSTAVA with commentary by Śrīvatsāṅkamiśra.

Begins on fol. 45 *a* of the MS. described under D. No. 17235.

The commentator's name is not found in this Manuscript.

Same work as that described under D. No. 10427. Wants 13 stanzas in the beginning and three stanzas in the end.

D. No. 17238

Palm leaf. 18½ × 2 inches. Pages, 420. Lines, 17–20 on a page. Grantha. Injured. Old. Extent, 24,000 granthas.

रामायणम् by वाल्मीकि ।

RĀMĀYAṆAM by Vālmīki.

Same work as that described under D. No. 1806.

Complete in seven Kāṇḍas but the first sarga of the Bālakāṇḍa of Rāmāyaṇa called Saṁkṣeparāmāyaṇa incomplete.

Fol. 210 contains 21st sarga of Pādmapurāṇa the beginning and end of which are given below :—

Beginning :

रामं रामानुजं सीतां भरतं भरतानुजम् ।
सुग्रीवं वायुपुत्रं च प्रणमामि पुनः पुनः ॥
बिन्दुदुर्लिपिविसर्गवीथिका-
पङ्क्तिभेदपदभेददूषणम् ।

महादेवः ।

तस्मिन्दिने दिवा पुण्ये शुभलग्ने शुभान्विते ।
राघवस्याभिषेकार्थं मङ्गलं चक्रिरे जनाः ॥
वसिष्ठो वामदेवश्च जाबलिरथ काश्यपः ।
मार्कण्डेयश्च मौद्गल्यः पर्वतो नारदस्तथा ॥
एते महर्षयः सर्वे जपहोमपरस्सरम् ।
अभिषेकं शुभं चक्रुः काकुत्स्थं जगतां पतिम् ॥

End :

इत्थं विसृष्टाः खलु देव सर्वे स्वं स्वं पदं जग्मुरतीव तुष्टाः ।
हृष्टाः पठन्तः स्तवमस्मदुक्तं रामं स्मरन्तो वरविश्वरूपम् ॥

Colophon :

इति पाद्मपुराणे उमामहेश्वरसंवादे उत्तरखण्डे श्रीरामचन्द्रपट्टाभिषेक-विश्वरूपसन्दर्शनयोगो नाम एकविंशः सर्गः ।

D. No. 17239

Palm leaf. 15¼ × 1½ inches. Pages, 13. Lines, 7 on a page. Grantha. Much injured (ends being eaten off by book worms). Extent, 114 granthas.

गायत्रीप्रशंसा ।

GĀYATRĪPRAŚAMSĀ.

In praise of Gayatrī.

Complete. Some leaves are broken. Taken from Brahmakaivarta-purāṇa. On the ceremonial touching of certain parts of the body while repeating at the same time the syllables of the Gāyatrīmantra.

Beginning :

अथातः संप्रवक्ष्यामि ऋषिच्छन्दांसि देवताः ।
प्रतिपादं तथा विप्राः प्रतिवर्णं यथाक्रमात् ॥

* * *

गायत्रीच्छन्द उक्तं स्याद् ब्रह्मा प्रोक्ता [तु] देवता ।
द्वितीयस्यापि पादस्य गौतमो मुनिरुच्यते ॥

End :

स्वशरीरे तु सावित्रीं विन्यसेदक्षरक्रमात् ।
पादांगुष्ठे च गुल्फे च जङ्घे जानुद्वये तथा ॥

दक्षिणे पश्चिमे चैव तथैव ब्राह्मणोत्तमाः ।
उत्तरे च तथा . . . . . तिताः ॥

Colophon :

इति ब्रह्मकैवर्ताख्ये महापुराणे गायत्रीप्रशंसायां पञ्चनवमाः ।

D. No. 17240

Palm leaf. 16¾ × 1½ inches. Pages, 34. Lines, 11 on a page. Grantha. Slightly injured. Old. Extent, 765 granthas.

चतुर्दशलक्षणीक्रोडपत्रम्—अभिनवकाशिका ।

CATŪRDAŚALAKṢAṆĪKROḌAPATRAM—ABHINAVAKĀŚIKĀ.

Same work as that described under R. No. 6552 wherein see for beginning. Breaks off in Prathamamiśralakṣaṇa.

End :

प्रतियोगिवैयधिकरण्यभेदप्रतियोगितावच्छेदकतावच्छेदकतायाः स्वावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नत्वेन विशेषणीयत्वात् । इत्थं च प्रमेयसाध्यके प्रमेयत्वेन संयोगेन प्रमेयाभावं तादृशप्रमेयवद्भेदं चादाय लक्षणसङ्गतिरित्याहुः ।

The name of the commentary is not mentioned in this MS. but in the colophon of the another MS. it is mentioned as "Abhinavakāśikā".

D. No. 17241

Palm leaf. 18½ × 1¼ inches. Pages, 74. Lines, 6 on a page. Telugu. Injured. Old. Extent, 1,080 granthas.

किरातार्जुनीयम् सव्याख्यानम् by भारवि and मल्लिनाथ ।

KIRĀTĀRJUNĪYAM with commentary by Bhāravi and Mallinātha.

Same work as that described under D. No. 11482.

The commentary by Mahopādhyāya Kolacala Mallinātha.

Contains Sargās 3, 4 and 8 complete. The commentary is called "Ghaṇṭāpatha".

D. No. 17242

Pages, 2. Lines, 5 on a page. Telugu. Good. Extent, 10 granthas.

तत्त्वमसिपञ्चकम् ।

TATTVAMASIPAÑCAKAM.

Begins on fol. 7*a* of the MS. described under D. No. 9372.

Similar to the work described under R. No. 488 (*j*).

Complete.

It is mentioned in this MS. that these Slokās were uttered when Ādiśaṇkara had entered into the body of the king Amaruka.

Beginning :

निस्तमसि नीरजसि निर्गलितसत्त्वे
तेजसि विवेकजुषि भेदमतिशून्ये ।
निर्वचनमानमपदातिगमचिन्त्यं
तत्त्वमसि तत्त्वमसि तत्त्वमसि राजन् ॥ १ ॥
यज्जनितमेतदखिलं जगदनित्यं
स्वप्नजगदभ्रगजवारिमृगतुल्यम् ।
अप्रतिममूर्तिरहितं परसुखं य-
त्तत्त्वमसि तत्त्वमसि तत्त्वमसि राजन् ॥ २ ॥

End :

देवगुणजालमतिलीलमतिलोलं
येन लसितं भवति धीपुरशतं च ।
अद्वयमनन्तकमपारमतिसूक्ष्मं
तत्त्वमसि तत्त्वमसि तत्त्वमसि राजन् ॥ ५ ॥

Colophon

सम्पूर्णम् ।

D. No. 17243

Pages 2. Lines, 5 on a page. Telugu. Good. Extent, 8 granthas.

कौपीनरत्नपञ्चकम् by शङ्कराचार्य ।

KAUPĪNARATNAPAÑCAKAM by Śankarācārya.

Begins on fol. 11*a* of the MS. described under D.No. 9372 wherein this work has been mentioned as "Kaupnapañcaka" in the list of other works.

Same work as that described under R. No. 1229 (*e*) wherein this work has been mentioned as "Kaupīnapañcaka" but with a colophon as given below.

Complete.

Colophon :

इति शङ्कराचार्यविरचितं कौपीनरत्नपञ्चकं सम्पूर्णम् ॥

D. No. 17244

Pages, 4. Lines, 5 on a page. Telugu. Good. Extent, 14 granthas.

शिवमानसपूजापञ्चकम् by शङ्कराचार्य ।

ŚIVAMĀNASAPŪJĀPAÑCAKAM by Śaṅkarācārya.

Begins on fol. 12*a* of the MS. described under D. No. 9372.

Same work as that described under D. No. 5525 wherein this work has been mentioned as "Śivamānasapūjā".

See for beginning D. No. 5525 and D. No. 8609.

This work is also called "Ātmamānasikapūja".

Complete.

End :

आत्मा त्वं गिरिजा मतिः परिजनाः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरः
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ ९ ॥

Colophon :

इति श्रीमच्छङ्कराचार्यविरचितं मानसपूजापञ्चकं सम्पूर्णम् ।

D. No. 17245

Palm leaf. 12 × 1¼ inches. Pages, 58. Lines, 9 on a page. Grantha. Injured. Old. Extent, 675 granthas.

आह्निकम् by गोपालदेशिक ।

ĀHNIKAM by Gopāladeśika.

Same work as that described under D. No. 2826 but with the addition of two extra Stanzas at the end as given below.

Complete, but some leaves are wanting in the middle.

Beginning :

स्वाचान्तः स्वोर्ध्वपुण्ड्रः प्रणवनमजिनाद्यासनं स्वासुयामः
साङ्गन्यासो जपः स्याद्धृदयकमलके मानसी देवपूजा ॥
वामस्थं वारिपात्रं सुमसितरतश्चान्यदग्रेऽर्घ्यपाद्य-
स्नानीयाचाममध्यद्धिरितनुकुसुमस्वात्मनां प्रोक्षणं स्यात् ॥

आह्वानं चासनाद्यं पद्मसलिलमथाचामपुंसूक्तयुक्त-
स्नाने वस्त्रोपवीते मलयजकुसुमे धूपदीपौ क्रमेण ।
मध्वादिः पर्क आदावुपरि च सलिलं पायसाद्यन्नजातं
पानीयाचामपूगं परिगतिनमनोद्वासनं विष्णुपूजा ।

Colophon :

इत्याह्निकं समाप्तम् ।

D. No. **17246**

Palm leaf. 14½ × 1½ inches. Pages, 196. Lines, 7 on a page. Grantha. Slightly injured. Old. Extent, 2,058 granthas.

शब्दरत्नाकरः by वामनभट्टबाण ।

ŚABDARATNĀKARA by Vāmanabhaṭṭabāṇa.

Same work as that described under R. No. 2436.

Complete in three Kāṇḍas.

The author is son of Kov(m)aṭiyajvan and grandson of Varadāgnicit of Vatsa family.

D. No. **17247**

Palm leaf. 13¾ × 1⅜ inches. Pages, 242. Lines, 5 on a page. Telugu. Slightly injured. Old. Extent, 1,210 granthas.

नानार्थरत्नमाला by इरुगपदण्डाधिनाथ ।

NĀNĀRTHARATNAMĀLĀ by Irugapadaṇḍādhinātha.

Same work as that described under D. No. 1719.

See for remarks and extracts, pages 41 and 188 of M. Śesagiriśāstri's report on a Search for Sanskrit and Tamil MSS. [1893—94], No. 2.

Complete in six kāṇḍas.

D. No. **17248**

Palm leaf. 14 × 1½ inches. Pages, 126. Lines, 6 on a page. Telugu. Much injured. Old. Extent, 1,134 granthas.

नानाव्रतकल्पः ।

NĀNĀVRATAKALPAḤ.

Contains the following Vratas :—

(1) Sarpasaṃskāraḥ 1 (*a*). Same work as that described under D. No. 3846.

(2) Haritālikāgaurīvratam 5 (*a*). Same work as that described under D. No. 8606.

(3) Svarṇagaurīvrata 10 (*a*). Same work as that described under D. No. 8603.

(4) Varalakṣmīvratakalpaḥ 14 (*a*). Same work as that described under D. No. 8470.

(5) Ṛṣipañcamīvratodyāpanam 20 (*a*). Same work as that described under D. No. 8248.

(6) Ṛṣipañcamīvratakalpaḥ 28 (*a*). Same work as that described under D. No. 8231.

(7) Kedāreśvaravratakalpaḥ 31 (*a*). Same work as that described under D. No. 8278.

(8) Amāsomavāravratakalpaḥ 34 (*b*). Same work as that described under D. No. 8195.

(9) Vināyakavratakalpaḥ 40 (*a*). Same work as that described under D. No. 8499.

(10) Yamunāpūjā 48 (*a*). Same work as that described under D. No. 8420.

(11) Anantavratakalpaḥ 50 (*b*). Same work as that described under D. No. 8168.

D. No. 17249

Palm leaf. 16 × 1½ inches. Pages, 4. Lines, 8 on a page. Grantha. Injured Old. Extent, 60 granthas.

ज्ञानार्णवः ।
JÑĀNĀRṆAVAḤ.

Begins on fol. 1*a*. The other works herein are :—Kāśyapasaṃhitā 3 (*a*), Parameśvarasaṃhitā 37 (*a*), Gopālamantrakalpaḥ 43 (*a*), Vihagēndrasaṃhitā 72 (*a*).

Contains Paṭalas 15 and 29 complete.

Same work as that described under R. No. 12.

Gives the details relating to several mantras.

D. No. 17250

Pages, 68. Lines, 8 on a page. Grantha. Injured. Extent, 1,088 granthas.

काश्यपसंहिता ।
KĀSYAPASAMHITĀ.

Begins on fol. 3(*a*) of the MS. described under D. No. 17249.

Same work as that described under R. No. 1738 (*b*) wherein see for the end.

Contains adhyāyas 1 to 12 complete. This work is also called " Garuḍapañcākṣarīkalpaḥ".

Beginning :

काश्यपं तं महात्मानमादित्यसमतेजसम् ।
अभिवाद्योपसङ्गम्य गौतम पर्यपृच्छत ॥

* * * *

तारतारानुतारं च मन्त्रमष्टाक्षरं परम् ॥
द्वादशार्णं षडर्णं च स्तोत्रमन्त्रं तथैव च ।
व्यूहमन्त्रचतुष्कं च व्यूहान्तरमतः परम् ॥
ततो विहगमन्त्रांश्च लक्ष्मीवन्त्रगणं तथा ।
पञ्चायुधमनुं चैव विष्वक्सेनमतः परम् ॥
प्रवक्ष्यामि श्रुतं पूर्वं महादेवेन भाषितम् ।
शृणु सर्वं मुनिश्रेष्ठ सावधानेन चेतसा ॥

D. No. 17251

Pages, 11. Lines 7 on a page. Grantha. Injured. Extent, 165 granthas.

पारमेश्वरसंहिता ।

PĀRAMEŚVARASAMHITĀ.

Begins on fol. 37*a* of the MS. described under D. No. 17249.

Same work as that described under R. No. 1657.

Contains 23rd Adhyāya only complete.

D. No. 17252

Pages, 58. Lines, 7 on a page. Grantha. Injured. Extent, 797 granthas.

गोपालमन्त्रकल्पः (सनत्कुमारसंहितास्थः) ।

OPALAMANTRAKALPAḤ (which is in the Sanatkumāra-samhitā).

Begins on fol. 43 *a* of the MS. described under D. No. 17249.

Same work as that described under R. No. 930 (*a*).

Complete in five paṭalas as found in the Sanatkumārasamhitā. ol. 71 contains "Viṣvaksenastotram." Incomplete.

D. No. 17253

Pages, 84. Lines 8 on a page. Grantha. Injured. Extent, 1,344 granthas.

विहगेन्द्रसंहिता ।

VIHAGENDASAMHITĀ.

Begins on fol 72 *a* of the MS. described under D. No. 17249.

Same work as that described under R. No. 3957 wherein see for beginning.

Contains the patalas 1 to 24 complete.

End :

एतत्ते कथितं पुण्यं पठ्यमाने शृणोति च ।
मुच्यते सर्वपापेभ्य पातकानां वि . . . ॥
. . . . . बलवान . . . अरोगी श्रियमाप्नुयात् ।
गोऽन्यान्कामान्वरेद्वापि महामूढमिदं जगत् ।
अहो मूढा न जानन्ति गोविन्दं पुरुषोत्तमम् ॥

Colophon :

इति श्रीपाश्वरात्रे (विहगेन्द्रसंहितायां मन्त्ररहस्ये) . . . :
. . . . सुदर्शनकल्पे मोक्षोपायविधानं नाम
चतुर्विंशति पटलः ।

D. No. 17254

Palm leaf. 10 × 2 inches. Pages, 156. Lines, 9 on a page. Nandinágari. Slightly injured. Old. Extent, 1,800 granthas.

अद्वैतकालानलः by नारायणार्य ।

ADVAITAKĀLĀNALAḤ by Nārāyaṇārya.

Similar to the work described under D. No 4848.

Contains jvālās 1 and 2 complete 3rd incomplete.

Beginning :

श्रियः कान्तं कान्तागणितगुणरत्नैकानलयं
सदा दुःखाविद्याद्यखिलविविधावद्यवि . लम् ।
सरो यत्सम्पूर्णं प्रमितिहृदयाम्भोरुहजुषं
नृसिंहं ध्यायामोऽखिलकुमतकालानलदृशम् ॥
अनन्तवेदनिश्वासप्रसपन्नासिकापुटम् ।
हयास्यं कमलाकान्तं नुमः कमलजार्चितम् ॥

येनाद्वैतमतादिदावदहनो विश्वक्षयायोद्यतो
ध्वस्तो व्याससुधासमुद्रविलसज्ज्ञानामृतं वर्षता ।
पूर्णः सत्सरसीगणोऽतिमहितः श्रीनीलकण्ठेन सः
स्वानन्दं वितनोतु विष्णुपदगः स्वानन्दतीर्थाम्बुदः ॥

आनन्दतीर्थचरणं शरणं यामि यद्बलात् ।
अद्वैतिरसनाच्छेदकर्तरी वाग्विजृम्भते ॥

नन्वन्येऽपि वेदविरुद्धा भूयांसः समया सन्ति । तत्किमित्यद्वैत-मत एव प्रद्वेषविशेष इत्यत आह— अन्येऽपि चार्वाकतथागतार्हतप्रभा-कराक्षांघ्रीकणादकल्पिता कदागमा सन्ति । तथापि नो तथा यथायथ-मद्वैत . . . . । स्वपरसिद्धान्तसाधनबाधनसामर्थ्यविकलतयाप्यर्थवत्वेन सर्वदुरागमेष्वप्यत्यन्ताधमत्वादीदृशोऽन्यः कोऽप्यधमो नास्तीत्यतस्तस्यै-वात्यन्तहेयत्वादुक्तमुपपन्नमिति भावः ।

* * * * * *

श्रीनारायणपण्डितार्यकृतिना सन्दीपिते सर्वतः
प्रोदञ्चन्मरुदुद्ग्रहागममहानुग्राहलब्धौजसा ।
मायाद्यादिमहाटवीप्रलयकृत्यद्वैतकालानले
प्रादुर्भावमगात्समुज्वलतरः प्रज्वाल इत्यादिमः ॥

सर्वतः सर्वदेशेषु कालेषु वा सर्वेभ्योऽपि शास्त्रेभ्यो वा प्रकर्षेण प्रवर्तते यो मरुदुद्ग्राहागमो मरुता प्राणरूपानन्दतीर्थविरचितं शास्त्रं सर्वदेवेभ्यः शेषरुद्रगरुडादिभ्यः प्रकर्षेण काशमानो यो मरुदुद्ग्रहो मरुत्सु सर्वप्राणेषूद्ग्रहः . . . . अस्य प्राणस्तस्यागमः शास्त्रमिति वा योज्यम् । तस्यागमस्य योऽयं परमानुग्रहस्तेन लब्धं प्राप्तमोजो येनेति प्रसिद्धानन्दसन्दीपनेऽपि महामारुतागमस्य सा(?)विद्यमिति भावः ।

Colophon :

इत्यद्वैतकालानले प्रथमः प्रज्वालः ।

अथाप्पय्यदीक्षितोत्प्रेक्षितं माध्वाभिमतपञ्चाधिकरण्यां दूषणाभासजाल-मनूद्य निराचिकीर्षुर्गुरुप्रणामाचरणपूर्वकं चिकीर्षितं प्रतिजानीते—

प्रणम्य श्रीमदानन्दतीर्थपादाम्बुजद्वयम् ।
अप्पय्यदीक्षिताक्षेपप्रतिक्षेपं प्रचक्ष्महे ॥

Colophon :

श्रीनारायणपण्डितार्यकृतिना अद्वैतकालानले
प्रादुर्भावमगाद्द्वितीयक इह ज्वालोऽयमत्युज्ज्वलः ।

* * * * *

एवमुत्तरप्रज्वालारम्भे मङ्गलं विधाय चिकीर्षितार्थं ध्वनिना प्रतिजानीते । नरसिंहाधिकरणदूषणार्थं मदनमोहाद्वा प्रवृत्तस्याप्पय्यदीक्षितस्य कृतिरिदानीं संगृह्यत इति ध्वनिः । तत्र तावत्पूर्वाधिकरणे—पूर्वपक्षानुवादकथनश्लोकं तद्विवरणं चानुवदति—

आत्मा ब्रह्मेत्यधीतः श्रुतिशिखरगणैर्निर्विशेषश्च सर्वैः
किं तत्र स्वप्रकाशे गुणलवरहिते वस्तु शास्त्रेण चिन्त्यम् ।
इत्याक्षेपो गुरूणां श्रुतिशतविषये स्वाप्रणम्यत्ववादः
श्रुत्यन्तानां निरूप्यः स यदि जडमते केन शास्त्रस्य
न स्यात् ॥

End :

एवमेव त्वदीयग्रन्थपर्यालोचनया वेदान्तानां विरुद्धस्वभावजीवब्रह्मैक्यपरत्वात्स्वप्रकाशनित्यसिद्धप्रत्यगात्मपरत्वाद्वा तत्र मीमांसा नारब्धव्येत्यर्थो गलितः । तत्रापि त्वद्रीत्यैव शक्यमेवं वक्तुम् । प्रमाणशिखामणयो हि वेदान्ताः ।

D. No. 17255

Pages, 8. Lines, 7 on a page. Grantha. Injured. Extent, 75 granthas.

प्रपञ्चमिथ्यात्वानुमानखण्डनम् ।

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANAM.

Begins on fol. 1*a* of the MS. described under D. No. 11336.
Similar to the work described under R. No. 1364 (*b*).
Wants beginning.

Beginning :

. . . . . जगन्मिथ्यात्वसाधकमनुमानद्वयं प्रभान्ति । कथमिति चेत् । प्रपञ्चो मिथ्या दृश्यत्वात् शुक्तिरूप्यादिवत् । घटादयोऽपरमार्थाः . . . . . नत्वात् रज्वाद्यधिष्ठानसर्पादिवदिति ।

अत्र प्रथमतो दृश्यत्वानुमाने दूषणान्युच्यन्ते । पक्षः किमसिद्धो वा सिद्धो वा ।

End :

अन्यथा भवतां मते आमोक्षादविद्यावशेनाप्रकाशमानत्वाद् ब्रह्मणोऽपि मिथ्यात्वं स्यात् । तस्मादेतदनुमानेन घटादीनामपारमार्थिकत्वकथनमसङ्गतमिति ।

D. No. 17256

Pages, 6. Lines, 7 on a page. Grantha. Injured. Extent, 60 granthas.

आनन्दतारतम्यखण्डनम् ।

ĀNANDATĀRATAMYAKHAṆḌANAM.

Begins on fol. 5 *a* of the MS. described under D. No. 11336.
Similar to the work described under D. No. 4869.
Complete.

Beginning :

यदुक्तं देवमनुष्यादीनां मुमुक्षूणां ज्ञानतारतम्यस्य प्रत्यक्षतः पुराणतश्च सिद्धत्वात्तज्जन्यमुक्तावपि तेषामानन्दतारतम्यं सिद्धमिति तदनुपपन्नम् । कथमिति चेत् ।

"दृश्यते त्वपरोक्षेण ज्ञानेनैव परं पदम् ।
उपासनं त्वापरोक्ष्यं गमयेत्तत्प्रसादतः" इति ।

End :

अतो नेयं श्रुतिश्चानन्दतारतम्यप्रतिपादिका । किं च कानिचित्पुराणवचनानि आनन्दतारतम्यप्रतिपादकानि सन्त्यपि परमसाम्यश्रुतिविरोधात्सालोक्यपराणि वा उपासनकालीनानुभवपराणि वा नेतव्यानि । तस्मादानन्दतारतम्याङ्गीकारे मुक्तेर्वा प्रमाणस्य वा अभावात्प्रमाणशरणानां बुधानां नायं पक्षः क्षोदक्षम इति ।

D. No. 17257

Pages, 4. Lines, 7 on a page. Grantha. Injured. Extent, 54 granthas.

तत्त्वमसिश्रुत्यर्थविचारः ।

TATTVAMASIŚRUTYARTHAVICĀRAḤ.

Begins on fol. 9 *a* of the MS. described under D. No. 11336.

Similar to the work described under R. No. 671 (*b*)

Complete.

Beginning :

अद्वैतिना तत्त्वमस्यादिवाक्यजन्यज्ञानाज्जीवो मुक्तो भवतीति सिद्धान्तः । तत्र किंचिदुच्यते तद्ज्ञानं सविषयं वा निर्विषयं वा । सविषयत्वे ब्रह्मविषयं वा तदन्यविषयं वा । ब्रह्मविषयत्वे विशुद्धब्रह्मविषयं वात मायाशबलितब्रह्मविषयं वा शुद्धब्रह्मविषयत्वे ब्रह्मणो दृश्यत्वं स्यात् ।

End :

असत्यं चेदसत्यं तत्कथमन्तिमज्ञानविषयं भवेत् । तद्ज्ञानस्य निर्विषयत्वे निर्विषयज्ञानस्य लोके वेदे चाप्रसिद्धत्वात् अन्तिमज्ञानस्य ज्ञानत्वमेव न स्यात् । तस्मात्तत्त्वमस्यादिवाक्यजन्यमन्तिमज्ञानं मोक्षहेतुरिति पक्षो न क्षोदक्षम इति ।

D. No. 17258

Pages, 4. Lines, 7 on a page. Grantha. Injured. Extent, 36 granthas.

श्रीविभुत्वसमर्थनम् ।

ŚRĪVIBHUTVASAMARTHANAM.

Begins on fol. 15 *a* of the MS. described under D. No. 11336.

Similar to the work described under R. No. 2382.

Incomplete.

Beginning :

श्रियो विभुत्वे प्रमाणानि ।

देशात्कालात्स्वरूपाच्च परिच्छेदो न मे स्मृतः ।
यथा सर्वगतो विष्णुस्तथैवेयं हरिप्रिया ॥
नित्यं तद्धर्मचारिणी · · · · · · ·
एषाभिसृजते काले सैषा पाति जगत्त्रयम् ।
जगत्संहरते चान्ते तत्तत्कारणसंस्थिता ॥

End :

सत्त्वरजस्तमसां गुणत्वस्थापनप्रमाणम् :—
" दैवी ह्येषा गुणमयी " " एभिर्गुणमयैर्भावैः "
' सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ' ।
' ससर्ज भगवानादौ त्रीन्गुणान्प्रकृतेः परः ।

D. No 17259

Pages, 6. Lines, 6 on a page. Grantha. Injured. Extent, 60 granthas.

आनन्दतारतम्यखण्डनम् ।

ĀNANDATĀRATAMYAKHAṆḌANAM.

Begins on fol. 17 *a* of the MS. described under D. No. 11336

Similar to the work described under D. No. 4869.

Incomplete.

Beginning :

कश्चिद्देवनरादीनां मुक्तानां तारतम्यतः ।
आनन्दसिद्धिं प्राहुस्तत्प्रकार इह लिख्यते ॥
मुक्तौ ज्ञानस्य हेतुत्वं तारतम्यं च दृश्यते ।
यत्राधिक्ये फलाधिक्यं न चेत्तन्निष्फलं भवेत् ॥
अभावे तारतम्यस्य वैषम्यादिः प्रस [ज्यते] ।

End :

दृश्यते न तु मुक्तेभ्यो मुक्तानां सा कदाचन ।
मनुष्यादिः शब्द एव मुक्तामुक्तपरो न च ॥
तस्मात्पृथग्गृहीतस्य श्रोत्रियेतिपदेन च ।
तेन शब्देन मुक्तस्य ग्रहणं नोपपद्यते ॥

Fol. 19 contains the same matter in prose incomplete.

D. No. 17260

Pages, 5. Lines, 6 on a page. Grantha. Injured. Extent, 40 granthas.

सत्तात्रैविध्यनिरूपणम् ।

SATTĀTRAIVIDHYANIRŪPAṆAM.

Begins on fol. 20 *a* of the MS. described under D. No. 11336.

Same work as that described under R. No. 1364 (*a*) but with the different end. This work has been mentioned as " Vyāvahārikasatyatva Khaṇḍanam.

Complete.

End :

नापि त्रयोदशः । चेतनाचेतनान्यतरत्वमितिवत् चिदचिदीश्वरान्यतमत्वमिति चेत्कः कुप्येत् । 'सदेव सोम्येदमग्र आसीदि'ति श्रुतिरिति चेत् तर्हि त्वत्पक्षेऽपि तदेवानुप्राविशत्' 'सच्च त्यच्चाभवत् ' 'नित्यो नित्यानां चेतनश्चेतनानाम्' 'ज्ञाज्ञौ द्वावजावीशानीशौ' इत्यादि द्वैतश्रुतयः कुप्येरन् । नापि चतुर्दशः । वेदान्तवाक्यानामपि लोकान्तर्गतत्वेन तज्जन्यप्रतीतिमात्रसिद्धत्वेन ब्रह्मणस्तस्यापि व्यावहारिकत्वं स्यात् । तस्मात् प्रपञ्चस्य व्यावहारिकत्वमेव न सम्भवतीति प्रतिभाति ।

D. No. 17261

Pages, 5. Lines, 6 on a page. Grantha. Injured. Extent, 40 granthas.

नारायणस्य जगत्कारणत्वविचारः ।

NĀRĀYAṆASYA JAGATKĀRAṆATVAVICĀRĀḤ.

Begins on fol. 23 *a* of the MS. described under D. No. 11336.
Complete.

Maintains that God Śri Nārāyaṇa is the supreme cause of the world.

Beginning :

अत्रेदं साध्यते । नारायणः परं ब्रह्मेति । कारणवाक्येषु तस्यैव परमकारणत्वेन च मोक्षप्रकरणेषु मोक्षप्रदत्वेन मुक्तप्राप्यत्वेन च दृश्यमानत्वात् । तथा हि श्रुतयस्तैत्तिरीयोपनिषदि 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्तीत्यादिना जगत्कारणमेव परतत्त्वमित्यवगम्यते ।

End :

उक्तं च मनुना—

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।
सर्वास्ता निष्फलाः प्रोक्तास्तमोनिष्ठा हि ताः स्मृताः ॥

इति ॥

तस्मात् श्रीमन्नारायणस्यैव सर्वकारणत्वं मोक्षप्रदत्वं मुक्तप्राप्यत्वं च सिद्धम् ।

D. No. 17262

Pages, 16. Lines, 6 on a page. Grantha. Injured. Extent, 192 granthas.

शिवस्य जगत्कारणत्वविचारः ।

ŚIVASYA JAGATKĀRAṆATVAVICĀRAḤ

Begins on fol. 25 *a* of the MS. described under D. No 11336.

Incomplete.

A discussion of the view that God Śiva in the supreme cause of the world.

Beginning :

ननु शिव एव जगत्कारणं नान्यः । तथा हि कारणवाक्येषु सद्ब्रह्मात्मशब्दाः साधारणा विशेषपर्यवसानसाकांक्षाः ।

यदा तमस्तन्न दिवा न रात्रिर्नसन्नचासच्छिव एव केवलः ।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी ॥

इति श्वेताश्वतरोपनिषदुपस्थापिते शिव एव पर्यवसन्ति ।

*

किं च यजुर्वेदे चतुर्थे काण्डे पञ्चमसप्तमप्रश्नद्वयाभ्यां रुद्रवैभवाः प्रदर्शिताः । तस्माज्जगत्कारणत्वेन मोक्षप्रदत्वेन सर्ववेदान्तवेद्यः सर्वस्मात्परः शिव एवेति सिद्धम् ।

End :

नारायणस्य 'अजायमानो बहुधा विजायते' इत्यादिषु जगदुपकारार्थं स्वेच्छावतारस्वरूपजन्मावगमादत्रापि इन्द्रानुजरामकृष्णादिवद् ब्रह्मरुद्रमध्यवर्तिविष्णुत्वेनावगन्तव्यः । यत्तु सन्यग ।

Fol. 32 contains Brahmasūtraviṣaya.

D. No. 17263

Pages, 6. Lines, 7 on a page. Grantha. Injured. Extent, 60 granthas.

अद्वैतिशिष्योपदेशसङ्गतिविचारः ।

ADVAITIŚIṢYOPADEŚA SAṄGATIVICĀRAḤ.

Begins on fol. 33*a* of the MS. described under D. No. 11336.

Complete.

Discusses whether Advaitism can be taught to a pupil.

Beginning :

अद्वैतिनां शिष्याय तत्त्वोपदेश एव न सङ्गच्छते । कथमिति चेत् तत्त्वोपदेशकाले तत्त्वोपदेष्टुराचार्यस्य श्रोता शिष्यः प्रतीतो वा उताप्रतीतो वा । प्रतीतश्चेत्प्रमितिसिद्धो वा उत भ्रान्तिसिद्धो वा । प्रमितिसिद्धश्चेद् भेदेन सिद्धो वा उताभेदेन सिद्धो वा । भेदेन सिद्धश्चेद्भेदासिद्धाय तस्मै भेदज्ञानवदाचार्यादभेदोपदेशः कथं घटते ।

End :

अप्रतीतश्चेदप्रतीताय शिष्याय कथं तत्त्वोपदेशः सङ्घटते । तस्मात्तन्मते आचार्यशिष्यभाव एव नोपपद्यत इति प्रतिभाति ।

Foll. 33 *b* and 34 *a* contain Tattvamasiśrutyarthavioāraḥ

Foll. 34 *b* and 35 contain Avidyākhaṇḍana.

D. No. 17264

Pages, 10. Lines, 5 on page. Grantha. Injured. Extent, 60 granthas.

ओङ्कारवादार्थः ।

ŌṄKĀRAVĀDĀRTHAḤ

Begins on fol. 37 *a* of the MS. described under D. No. 11336.

Similar to the work described under D. No. 4871

Complete.

Beginning :

अथातो ब्रह्मजिज्ञासेत्यारभ्यानावृत्तिः शब्दादनावृत्तिः शब्दादित्यन्तेषु ब्रह्मसूत्रेषु प्रतिसूत्रमाद्यन्तयोरोङ्काराध्याहारः कर्तव्य इति । तत्र प्रथमसूत्रे आदावध्याहृतस्योङ्कारस्य सूत्रावयवत्वश्चेत्युक्त्वा —

ओङ्कारं ब्रह्मणः कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोङ्कृतं पूर्वं पुरस्ताच्च विशीर्यते

इति प्रमाणं च केचिदाहुः तन्न समीचीनमिति प्रतिभाति । कथमिति चेत् ।

End :

अत्राहुः सम्प्रदायविदः । ब्रह्मपदार्थस्य गुणपरिपूर्णस्यैवोङ्कारपदार्थस्यापि गुणपरिपूर्णस्य विषयतासम्बन्धेन जिज्ञासायामन्वय इति ।

D. No. 17265

Pages, 12. Lines, 8 on a page. Grantha. Injured. Extent, 160 granthas.

उपादानकारणताविचारः ।

UPĀDĀNAKĀRAṆATĀVICĀRAḤ

Begins on fol. 42 *a* of the MS. described under D. No. 11336.

Complete.

A discussion about the material cause of the world.

Beginning :

वादो यः समभूच्छ्रीमत्कुम्भघोणं महापुरे ।
उपादानत्वविषयः पत्रारूढः स तन्यते ॥ १ ॥

विशिष्टाद्वैतं नः प्रथयति विशिष्टार्थलसितं
विशिष्टान्तर्मोदं प्रजननमशेषश्रुतिहितम् ।
उपादानं ब्रह्म प्रभवति निमित्तं च तदिदं
बहु स्यामित्यादि श्रुतिततिरवादीदविशयम् ॥ २ ॥

* * * *

विशिष्टाद्वैतिनां जगतो निमित्तमुपादानं च ब्रह्मेति राद्धान्तः । अयमेव समीचीनः श्रुतिस्मृतिसूत्राणां स्वा(सा)रः स्यात् ।

End :

तत्रेत्थमुक्तमस्माभिः । कथं तज्जन्मादिसूत्रासिद्धं तच्चोपपादनीयम् । एवं हि जन्मादिसूत्रार्थः । अस्य जगतः यतो यस्माज्जन्मादि उत्पत्तिस्थित्यादिकं तद् ब्रह्मेत्यवगन्तव्यमिति । कथमुक्तोऽर्थोऽवसीयत इति । तत्र परैर्भवत्वेतत् । पश्चाद्विचारयिष्याम इत्युक्तम् ।

D. No. 17266

Pages, 4. Lines, 6 on a page. Grantha. Injured. Extent, 30 granthas.

बद्धमुक्तव्यवस्थाविचारः ।

BADDHAMUKTAVYAVASTHĀVICĀRAḤ.

Begins on fol. 48 *a* of the MS. described under D. No. 11336.

Complete.

A discussion about liberated and unliberated individual souls.

Beginning :

श्रीभाष्ये द्वितीयाध्यायस्य प्रथमपादे आरम्भणाधिकरणे पूर्वपक्षी शङ्कते । द्वैतवादिनापि बद्धमुक्तव्यवस्था दुरुपपादा । अतीतानां कल्पानामानन्त्यात् । एकैकस्मिन्कल्पे एकैकमुक्तावपि सर्वेषां मोक्षसम्भवात् । अमुक्तानुपपत्तेः ।

End :

सर्वेऽपि मुक्ता भूगासुरिति पूर्वेषां कारिकापि निगमान्तदेशिकानां सूक्तिमनुसृत्य वर्तते । श्रीलक्ष्मणार्याणां कविकथककण्ठीरवगुरूक्तपूर्वोक्तश्लोकोदितप्रथमकल्परीत्या प्रतिभाति । जगदुज्जीवनार्थं अवतीर्णानामाचार्याणां सूक्तिषु विरोधः कथमङ्गीकार्यः । तस्मान्महद्भिरयं परिहार्यः ।

D. No. 17267

Pages, 2. Lines, 6 on a page. Grantha. Injured. Extent, 20 granthas.

आनन्दतारतम्यखण्डनम् by श्रीनिवासाचार्यः ।

ĀNANDATĀRATAMYA KHAṆḌANAM by Śrīnivāsācārya.

Begins on fol. 36 *a* of the MS. described under D.No. 11336.

Same work as that described under D. No. 4869.

Incomplete.

D. No. 17268

Pages, 14. Lines, 6 on a page. Grantha. Injured. Extent, 40 granthas.

आनन्दतारतम्यखण्डनम् by श्रीनिवासाचार्यः ।

ĀNANDATĀRATAMYAKHAṆḌANAM by Śrinivāsācarya.

Begins on fol. 50*a* of the MS. described under D. No. 11336.

Same work as that described under D. No. 4869, but with the addition of a stanza in the beginning as given below.

Incomplete.

Beginning :

श्रीवासराघवाख्येन बुधेन महदाज्ञया ।
आनन्दतारतम्यस्य विषये किंचिदुच्यते ॥

D. No. 17269

Pages, 10. Lines, 5 on a page. Grantha. Injured. Extent, 40 granthas.

बद्धमुक्तव्यवस्थाविचारः ।

BADDHAMUKTAVYAVASTHĀVICĀRAḤ.

Begins on fol. 52 *a* of the MS. described under D. No. 11336.

Same work as that described under D. No. 17266.

Incomplete.

Foll. 54 and 55 *a* contain Jīvalakṣaṇavicāraḥ.

Fol. 56 *a* contains Ānandatāratamyakhaṇḍana.

D. No. 17270

Pages, 16. Lines, 5 on a page. Grantha. Injured. Extent, 100 granthas.

शिखादण्डयज्ञोपवीतधारणसमर्थनम् ।

ŚIKHĀDAṆḌAYAJÑOPAVĪTADHĀRAṆASAMARTHANAM.

Begins on fol. 57 *a* of the MS. described under D. No. 11336.

Complete.

In support of the view that Sanyāsins must have a tuft of hair on the head, must carry the "three sticks" and must wear the "sacred thread".

Beginning :

कैश्चित्परमहंसैर्ब्रह्मसूत्रमुत्सृज्यते । किं तद्यज्ञोपवीतधारणे प्रमाणाभावाद्वा उत सामान्यतः प्राप्तस्य विशेषतो बाधाद्वा गृहस्थाश्रमानुष्ठित कर्मणां निवृत्तेरर्थात्तत्तदङ्गभूतयज्ञोपवीतनिवृत्तिश्च स्यादित्याशयाद्वा आहोस्वित् पूर्विकाणामनुष्ठानाद्वा । न प्रथम ।

* * * *

कैश्चित्परमहंसैस्त्रिदण्डधारणं विहायैकदण्डधारणं क्रियते तत्प्रमाणविरुद्धमिति प्रतिभाति । कथमिति चेत् । शाट्यायनकोपनिषदि कुटीचकादिचतुर्विधपरिव्राजकस्वरूपकथनप्रकरणे—

त्रिदण्डमुपवीतं च वासः कौपीनमेव च ।
शिक्यं कवचमित्येतद्बिभृयाद्यावदायुषम् ॥

इति वर्तते ।

* * * *

स वै द्विजातिस्तरुणस्त्रिदण्डभृ-
त्कमण्डलोष्णीषधरोऽप्यजायत ।

सुरक्तमाञ्जिष्ठपराम्बरः शिखी
पवित्रपाणिर्ददृशे तदद्भुतम् ॥ इति ॥

सशिखं वपनं कृत्वेत्येतदपि सविष्ठरमन्नं भुञ्जीतेत्यादिवत्कर्तव्यसाहित्येनान्वयः । तेन शिखासहित एव शेषवपनं कुर्यादित्यर्थः । न पुनः मघृतमन्नं भुञ्जीतेत्यादिवत् । बहुप्रमाणविरोधात् । तस्मात्परिव्राजकानां शिखाधारणमेव युक्तमिति प्रतिभाति ।

D. No. 17271

Pages, 21. Lines, 6 on a page. Grantha. Injured. Extent, 255 granthas.

ऋगर्थविचारः ।

RGARTHAVICĀRAḤ.

Begins on fol. 67 *a* of the MS. described under D. No. 11336.

Incomplete.

A discussion on the meaning of certain vedic hymns.

Beginning :

यो वैतां × × × × प्रजां ददुः । अस्यार्थः यः पुरुषः । अमृतेनेति जात्येकवचनम् । अमृतैः सूरिभिः । आवृतां परिपूर्णां तां प्रसिद्धां पुरीं वेद जानाति । तस्मै ब्रह्म श्रीमन्नारायणः ब्रह्मा चतुर्मुखः । च शब्देन रुद्रादिः समुच्चीयते ।

* * * *

यजुर्वेद द्वितीयकाण्डे तार्तीयप्रश्ने प्रजापतेस्त्रयस्त्रिंशद्दुहितरः आसन्नित्यारभ्याभिसाक्षिकपरिणीतभार्यापरिग्रहदोषशान्तये चन्द्रकर्तृकादित्यदेवताकचरुद्रव्यकप्रतीतियागे चन्द्रमसः कर्तृतया स्वाराज्यदेवताफलप्रदानप्रतीतिः ।

End :

पूर्वमिन्द्र ऐश्वर्ययोगे दृष्टान्ततयोक्तः । इह तु निर्जितशत्रुवर्गत्वे दृष्टान्ततयोपात्तः ।

D. No. 17272

Pages, 10. Lines, 5 on a page. Grantha. Injured. Extent, 50 granthas.

महावाक्यविवरणम् by शङ्कराचार्य ।

MAHĀVĀKYAVIVARAṆAM by Śaṅkarācārya.

Begins on fol. 78 *a* of the MS. described under D. No. 11336.

Same work as that described under D. No. 4710.

Complete but the last leaf is slightly injured.

D. No. 17273

Palm leaf. 14×1¾ inches. Pages 90. Lines, 13 on a page. Grantha. Injured. Old. Extent, 2,700 granthas.

न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका by श्रीकण्ठ ।

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ—TARKAPRAKĀŚIKĀ by Śrikaṇṭha.

Begins on fol. 1*a*. The other works herein are :—Tattvacintāmaṇidīdhitiprakāsavyākhyā—Sarvopakāriṇī 46 (*a*). Tattvacintāmaṇidīdhitiprakāśa 61 (*a*). Tattvacintāmaṇidīdhiti 133 (*a*)

Contains from Lakṣaṇāvāda to Yogyatāvāda in Śabdakhaṇḍa.

Same work as that described under D. No. 4223.

D. No. 17274

Pages, 30. Lines, 9 on a page. Grantha. Slightly injured. Extent. 400 granthas.

तत्त्वचिन्तामणिदीधितिप्रकाशव्याख्या—सर्वोपकारिणी by महादेव ।

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚAVYĀKHYĀ—SARVOPAKĀRIṆĪ by Mahādeva.

Begins on fol. 46 *a* of the MS. described under previous number.

A shorter commentary on the Tattvacintāmaṇidīthitiprakāśa of Bhavānanda described under D. No. 4092.

Same work as that described under R. No. 1023 wherein see for beginning and colophon. Contains up to Vyāptiprakaraṇa in Anumānakhaṇḍa.

Beginning :

. अनुमानलक्षणेऽपि कर्तव्यतया प्राप्ते फलतः स्वरूपतश्चेति ग्रन्थपर्यालोचनया पूर्वमनुमितितत्करणोभयनिरूपणस्यैव प्रतिज्ञातत्वेन विनिगमनाभावादिति भावः । अनुमितिरेव किमिति ।

End :

यदि चेत्यादिना पूर्वं मंशस्य प्रतिबन्धकत्वोक्त्या कार्यकालवृत्तितया तदुपगमनोक्तबाधकाभावात् । व्याप्तितदभावप्रत्यक्षे बाधीनपरामर्शे विशिष्टवैशिष्ट्यविषयतासत्वं तस्या जनकतावच्छेदकत्वेऽपि निश्चयत्वनिवेशस्यावश्यकत्वाच्च । अत एव परामर्शग्रन्थे दीधितिकृद्व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वादिति वाच्यम् ।

D. No. 17275

Pages, 144. Lines, 10 on a page. Grantha. Slightly injured. Extent, 2,880 granthas.

तत्वचिन्तामणिदीधितिव्याख्या-प्रकाशः by भवानन्दः ।

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ—PRAKĀŚAḤ by Bhavānanda.

Begins on fol. 61 *a* of the MS. described under D. No. 17273.

Same work as that described under D. No. 4092.

Contains Anumāna to the end of Vyadhikaraṇadharmāvacchinnābhāva.

D. No. 17276

Pages, 24. Lines, 10 on a page. Grantha. Slightly injured. Old. Extent, 375 granthas.

तत्वचिन्तामणिव्याख्या—दीधितिः by रघुनाथ ।

TATTVACINTĀMAṆIVYĀKHYĀ—DĪDHITI by Raghunātha.

Begins on fol. 133 *a* of the MS. described under D. No. 17273.

Same work as that described under D. No. 4002.

Contains Anumāna to the end of Kūṭaghaṭitalakṣaṇa.

D. No. 17277

Palm leaf. 13 × 2 inches. Pages, 69. Lines, 9 on a page. Nandinágari. Slightly injured. Old. Extent, 1,000 granthas.

ब्रह्मसूत्रानुव्याख्यानम् by आनन्दतीर्थ ।

BRAHMASŪTRĀNUVYĀKHYĀNAM by Ānandatīrtha.

Same work as that described under D. No. 4819.

Breaks off in the third pāda of the Second adhyāya.

D. No. 17278

Palm leaf. 9¼ × 1½ inches. Pages 378. Lines, 7 on a page. Nandinágarii. Injured. Old. Extent, 3,400 granthas.

गीताभाष्यव्याख्या—अर्थप्रकाशिका by नृसिंहमूर्त्याचार्य ।

GĪTĀBHĀṢYAVYĀKHYĀ—ARTHAPRAKĀŚIKĀ by Nṛsiṁhamūrtyācārya.

Contains Adhyāyās 5 to 18 complete but some leaves are broken in the middle.

Explains the commentary on the Bhagavadgita by Śrī Āṇandatīrtha.

Beginning :

तृतीयाध्यायोक्तमेवेति । न तु परोक्तं कर्मयोगं ब्रह्मात्मकत्वज्ञानरूप-मित्यर्थः । उक्तमिति हेतुगर्भम् । तस्यैवोक्त . . . . . . प्रपञ्चनं सम्भवति नान्यस्येत्यभिप्रायः । यदृच्छेति । अत्र (कृष्णोक्त) मर्जुनो ऽनुवदतीति टीकानुसारादित्यादीत्येतत् इत्यादाविति व्याख्येयम् । नियमना-दिनेति ।

Colophon :

इति श्रीमन्नृसिंहमूर्त्याचार्यकृतायां श्रीमद्गीताभाष्योक्तार्थप्रकाशिकायां पञ्चमोऽध्यायः ।

End :

समर्पितभाष्यो भगवाननन्तोऽपि मङ्गलमाननोति । पूर्णेति । पूर्णो ज्ञानादिना । अदोषश्चिन्तादिरहितो . . . . . महान्यो विष्णुस्त स्य गीतामाश्रित्य व्याख्येयत्वेनोपादाय पूर्णादीतिविष्णोर्यन्निरूपणं कृतं तेन निरूपणेन प्रभुर्मे सदा प्रीयतामित्यर्थः ।

Colophon :

इति श्रीमन्नृसिंहमूर्त्याचार्यकृतायां गीताभाष्योक्तार्थप्रकाशिकायां अष्टादशोऽध्यायः ।

D. No. 17279

Palm leaf. 14 × 1½ inches. Pages, 86. Lines, 6 on a page. Telugu. Injured Old. Extent, 900 granthas.

आदिपुरमहात्म्यम ।

ĀDIPURAMĀHĀTMYAM.

Same work as that described under D. No. 2370.

A portion of the Brahmāṇḍapurāṇa dealing with the local sacred greatness of Ādipura.

Contains Adhyāyas 16 to 24.

Complete.

D. No. 17280

Palm leaf. 13 × 1½ inches. Pages, 88. Lines, 7 on a page. Nandināgari. Injured. Old. Extent. 900 granthas.

ऋक्सन्ध्याभाष्यम् by वेङ्कटकृष्णाचार्य ।

ṚKSANDHYĀBHĀṢYAM by Veṅkaṭakṛṣṇācārya.

Similar to the work described under D. No. 2882.

Complete.

Beginning :

लक्ष्मीलक्ष्मीशपादाभ्यामियमस्तु नमस्कृतिः ।
यया निखिलभाष्याणि भवेयुर्भजतां हरिम् ॥
सर्वस्मृत्युदितं कृत्स्नं यदाराधनसाधनम् ।
तद्विधायकमन्त्राणां वृत्तिं वक्ष्ये यथाक्रमम् ॥
यावन्तो . . . . विकर्मस्थाः पृथिव्याद्या नरा द्विजाः ।
तेषां पावित्र्यसिद्ध्यर्थं सन्ध्या सृष्टा स्वयंभुवा ॥

श्रीव्यासः—

उपास्तिसन्धौ सूर्यस्य निशाया दिवसस्य वा ।
तामेव · · · · तस्मात्तु प्रवदन्ति महर्षयः ॥

सूर्यान्तर्गतभगवद्ध्यानमेव सन्ध्येत्युक्तं भवति । सन्ध्याधिकारकाल-माह —

मौञ्जीबन्धनमारभ्य सायं प्रातर्यथाविधि ।
मध्याह्नेऽपि च कर्तव्यं यावत्प्राणवियोजनम् ॥

Colophon :

इति प्रातः सन्ध्याप्रकरणं सम्पूर्णम् ।

End :

ज्योतिषि स्वयम्प्रकाशे जुहोमि प्रक्षिपामि । अहमनेन होमेन तत्सर्वं भस्मीकरोमीत्यर्थः । तदर्थमिदमभिमन्त्रितं जलं स्वाहा । मदीय वक्त्राग्नौ सुष्ठु हुतमस्तु ।

Colophon :

इति श्रीमद्वेङ्कटकृष्णाचार्येण कृतमृक्सन्ध्याभाष्यं सम्पूर्णम् ।

The manuscript is dated :

श्रीकृष्णाचार्यपुत्रेण वेङ्कटेशाख्यशर्मणा ।
सन्ध्याभाष्यं लिखित्वा तु प्रीत्यै माधवमध्वयोः ॥
शुभकृद्वत्सरे भाद्रे द्वितीयाशुक्लपक्षके ।
उत्तरर्क्षे इन्दुवारे सम्पूर्णं कृतवानमूत् (?) ॥

D. No. 17281

Palm leaf. 15¼ × 1½ inches. Pages 80. Lines 9 on a page. Telugu. Much injured. Old. Extent, 1,840 granthas.

आपस्तम्बश्रौतसूत्रभाष्यवृत्तिः by कौशिकराम ।

ĀPASTAMBAŚRAUTASŪTRA BHĀṢYAVṚTTIḤ by KAUŚIKARĀMA.

Same work as that described under D. No. 1061, for notice and extracts vide pages 5 and 148 to 150 of the "Report on the Search for Sanskrit and Tamil MS. for the year 1893–94" by Śeṣagiriśāstry.

Contains praśnas one and two complete, third incomplete, but the leaves are eaten away in both sides by white-ants.

D. No. 17282

Palm leaf. 15¼ × 1¼ inches. Pages 62. Lines 7 on a page. Grantha. Injured. Old. Extent, 650 granthas.

न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका by श्रीकण्ठ ।

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ—TARKAPRAKĀŚIKĀ by Śrikaṇṭha.

Begins on fol. 1*a*. The other work herein is :—

Nyāyasiddhāntamañjarīṭikā Āmodaḥ, 32*a*.

Same work as that described under D. No. 4223. Contains Pratyakṣakhaṇḍa incomplete.

D. No. 17283

Pages 265. Likes 7 on a page. Extent, 3,200 granthas.

न्यायसिद्धान्तमञ्जरीटीका—आमोदः by सुब्रह्मण्यः ।

NYĀYASIDDHĀNTAMAÑJARĪṬĪKĀ—ĀMODAḤ by Subrahmaṇya.

Begins on fol. 32*a* of the MS. described under previous D. No. 17282.

Same work as that described under R. No. 992, wherein see for the beginning.

Contains pratyākṣaparicchoda incomplete.

Beginning :

न च भवन्मतेऽपि स्पर्शभिन्नगुणत्वत्तिलौकिकविषयतायाः स्पर्शभिन्नगुणत्वयोश्च (?) विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावद्वयमिति द्वादशकार्यकारणभाव . . . . वृत्तिलौकिकविषयतया स्पार्शनत्ववाच्छिन्नं प्रति रूपस्य पृथक्कारणत्वस्यावश्यकतया विषयतात्वयो . . . . भाव विनिगमनाविरहेण कार्यकारणभावद्वयं चेति ।

D. No. 17284

Pages, 40. Lines, 5 on a page. Telugu, injured. Extent, 250 granthas.

महावाक्यरत्नावलिः by रामचन्द्र ।

MAHĀVĀKYARATNĀVALIḤ by Rāmacandra.

Begins on fol. 1*a* of the MS. described under D. No. 13846.

Same work as that described under D. No. 4708. Contains the passages 1 to 66 complete, 67 incomplete.

D. No. 17285

Pages, 28. Lines, 6 on a page. Telugu. Injured. Extent, 210 granthas.

आश्वलायनधर्मः ।

ĀŚVALĀYANADHARMAḤ.

Begins on fol. 24*a* of the MS. described under D. No. 13846.

Similar to the work described under D. No. 1164. Contains Brahmamārgācārādhyāya complete.

Beginning :

। आश्वलायनधर्मः।

आश्वलायनमाचार्यं नत्वापृच्छन्मुनीश्वराः ।
द्विजधर्मान्वदास्माकं स्वर्गप्राप्तिकरान्मुने ॥ १ ॥
इति तद्वचनं श्रुत्वा स धर्मान्मुनिरब्रवीत् ।
लोकस्य च हितार्थाय ब्रह्ममार्गरतस्य च ॥ २ ॥
स्नानं सन्ध्या जपो होमः स्वाध्यायाभ्यसनं तथा ।
माध्याह्निकक्रियाः पञ्चयज्ञाद्यतिथिपूजनम् ॥ ३ ॥

End :

मनः स्वस्थं तपो योगः स एवात्मप्रकाशकः ।
त्यक्तेन्द्रियसुखो लोके यस्तिष्ठत्यत्र कुत्रचित् ॥
स एव योगी मुक्तः स्यात्सर्वसङ्गविवर्जितः ।
यः कश्चिन्मानवो लोके वाराणस्यां त्यजेदसून् ॥
सचाप्येकोभवेन्मुक्तो नान्यथा मुनयो विदुः ।

Colophon :

। इत्याश्वलायनधर्मे ब्रह्ममार्गाचाराध्यायः समाप्तः ।

D. No. **17286**

alm leaf. 16 × 1¼ inches. Pages, 216. Lines, 7-8 on a page. Telugu. Injured. Old. Extent, 3,402 granthas.

ऋग्वेदब्राह्मणम् ।

ṚGVEDABRĀHMAṆAM.

Begins on fol. 1*a*. The other works herein are :—

Ṛgvedāraṇyakam 109*a*, Āśvalāyanaśrautāsūtram 151*a*.

Foll. 38 *b*, 66*b* are left blank.

Same work as that described under D. Nos. 32 and 33.

Complete.

D. No. **17287**

Pages, 82. Lines, 6 on a page. Telugu. Injured. Extent, 816 granthas.

ऋग्वेदारण्यकम् ।

ṚGVEDĀRAṆYAKAM.

Begins on fol. 109*a* of the MS. described under previous number.

Same work as that described under D. No. 38.

Complete.

D. No. **17288**

Pages, 18. Lines, 6-7 on a page. Telugu. Injured. Extent, 202 granthas.

आश्वलायनश्रौतसूत्रम् ।

ĀŚVALĀYANAŚRAUTĀSŪTRAM.

Begins on fol. 151*a* of the MS. described under D. No. 17286.

Same work as that described under D. No. 1029.

Incomplete. Contains 1st Adhyāya only.

D. No. **17289.**

Palm leaf. 15¾ × 1½ inches. Pages, 25. Lines, 6 on a page. Nāndināgarī. injured. Old. Extent, 281 granthas.

मायावादखण्डनपञ्चिकाव्याख्या by श्रीनिवास ।

MĀYĀVĀDAKHAṆḌANAPAÑCIKĀVYĀKHYĀ by Śrinivāsa.

Begins on fol. 1*a*. The other works herein are :—

Upādhikhaṇḍanavyākhyā 15*a*, Tattavanirūpaṇam 43 *a*, Prapañcamithyātvānumānakhaṇḍanavivaraṇapañcikā 47*b*.

Same work as that described under D. No. 15718.

Complete.

D. No. 17290

Pages, 56. Lines, 6 on a page. Nandināgari. Injured. Extent, 630 granthas

उपाधिखण्डनटीकाविवृतिः by श्रीनिवास ।

UPĀDHIKHAṆḌANAṬĪKĀVIVṚTIḤ by Śrīnivāsa.

Begins on fol. 15*a* of the MS. described under previous number.

Same work as that described under R. No. 5846.

Complete.

D. No. 17291

Pages, 10. Lines, 5 on a page. Nandināgari. Injured. Extent, 88 granthas.

तत्त्वनिरूपणम् ।

TATTVANIRŪPAṆAM.

Begins on fol. 43*a* of the MS. described under D. No 7289.

Complete.

On the Supreme Truth as stated in Advaita school of Philosophy.

Beginning :

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये ।
व्यासशङ्कररूपाय श्रीपरब्रह्मणे नमः ॥

पूर्णानन्दाय सत्यानामपि सत्याय शम्भवे ।
निःशेषज्ञानरूपाय नमोऽनन्ताय विष्णवे ॥

तत्त्वज्ञानस्य निखिलपुरुषार्थसाधनत्वं तत्त्वं निरूप्यते । अत्राध्यासोऽ-र्थतत्त्वं, बाध्यत्वं च स्वसङ्गिनिष्ठव्याप्यवृत्यत्यन्ताभावप्रतियोगित्वम् ।

End :

विश्वं सत्यादिति श्रुतिरिन्द्रबृहस्पतिस्तुत्यादिपरा । न तच्छेष-भूतविश्वपरमार्थपरा । वाक्यभेदप्रसङ्गात् । किं तु प्रमाणान्तराविरुद्ध-प्रत्यक्षादिप्रामव्यवहारकालाबाध्यत्वरूपामुख्यसत्यानुवादकैवेति न काचिद-नुपपत्तिः । अधिकमन्यत्रानुसन्धेयम् ।

Colophon :

। इदं प्रकरणं समाप्तम् ।

D. No. 17292

Pages, 6. Lines, 5 on a page. Nandināgari. Injured. Extent, 49 granthas.

प्रपञ्चमिथ्यात्वानुमानखण्डनविवरणपञ्चिका ।

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANAVIVARAṆA-PAÑCIKĀ.

Begins on fol. 47b of the MS. described under D. No. 17289.

Complete.

A controversial tract explaining another on the refutation of the inference, that the world is unreal.

Beginning :

सत्यज्ञानानन्दधर्मपरिभेदविवर्जितम् ।
अस्पृष्टानर्थमनिशमाश्रये नृहरेः पदम् ॥

विमतं मिथ्या दृश्यत्वात् । यदित्थं तत्तथा सम्प्रतिपन्नम् । न च जगतोऽभावादाश्रयासिद्धः पक्ष । तस्य पारमार्थिकत्वाभावेऽपि तत्र विमतत्वरूपपक्षतावच्छेद(क)स्याभवत्वासिद्धत्वाश्रयासिद्धत्वनवकाशात् ।

End :

तस्य पक्षे सान्द . . हेतौ व्यभिचारः । पक्षे साध्यव्यावर्तकधर्मस्य चानिश्चयात् । उपाधिसंशयाद्व्याप्तिमात्रसं . , . . . , . श्रमानेऽपि सम्बन्धानुपपत्त्यादिरूपतर्कशतकोटिनानुत्पादितपक्षो नानुमानविषयो भवति ।

Colophon :

. । प्रपञ्चमिथ्यात्वानुमानखण्डन . . . . का ।

D. No. 17293

Palm leaf. 15 × 7/16 inches. Pages, 248. Lines, 6 on a page. Telugu. Injured. Old. Entent, 2,232 granthas.

ऋग्विधानम् ।

ṚGVIDHĀNAM.

Same work as that described under D. No. 884.

Incomplete, wants the beginning and breaks off in the 8th Adhyāya of the 8th Aṣṭaka.

D. No. 17294

Palm leaf. 15 × 1¼ inches. Pages, 4. Lines 6 on a page. Nandināgari. Injured. Old. Extent, 22 granthas.

ईशावास्योपनिषत् ।

ĪŚĀVĀSYOPANIṢAD.

Begins on fol. 1*a*. The other works herein are :—

Īśāvāsyopaniṣadbhāṣyaṭīkā 3*a*, Vaiśākhamāhātmyam, 21*a*.

Same work as that described under D. No. 300.

Complete.

D. No. 17295

Pages, 36. Lines, 7 on a page. Nandināgari. Injured. Extent, 420 granthas.

ईशावास्योपनिषद्भाष्यटीका by जयतीर्थ ।

ĪŚĀVĀSYOPANIṢADBHĀṢYAṬĪKĀ by Jayatīrtha.

Begins on fol. 3*a* of the MS. described under previous number.

Same work as that described under R. No. 493.

Complete.

D. No. 17296

Pages, 18. Lines, 7 on a page. Nandināgari. Injured. Extent, 200 granthas.

वैशाखमाहात्म्यम ।

VAIŚĀKHAMĀHĀTMYAM.

Begins on fol. 21*a* of the MS. described under D. No. 17294.

Same work as that described under D. No. 2538.

Incomplete. Contains 23rd and 24th Adhyāyas only.

D. No. 17297

Palm leaf. 18¼ × 1⅜ inches. Pages, 99. Lines, 7 on a page. Grantha. Slightly injured. Old. Extent, 2,100 granthas.

उपक्रमपराक्रमः by अप्पयदीक्षित ।

UPAKRAMAPARĀKRAMA by Appayadīkṣita.

Same work as that described under R. No. 4268(*d*).

Complete.

The scribe adds :—

दीक्षितार्यसुपुत्रेण शामाचार्यसुजन्मना ।
नगरिस्थेन लिखितं ह्युपक्रमपराक्रमः ॥

D. No. 17298

Pages, 21. Lines, 7 on a page. Nandinagari. Injured. Extent, 231 granthas.

तत्त्वप्रकाशिकाव्याख्या—विषयवाक्यार्थविवृतिः by श्रीनिवास ।

TATTVAPRAKĀŚIKĀVYĀKHYĀ—VIṢAYAVĀKYĀRTHA-VIVṚTIḤ by Śrīnivāsa.

Begins on fol. 44*a* of the MS. described under D. No. 11459 wherein this work has been omitted to be mentioned in the list of other works.

Incomplete. Contains only two pādas in 1st Adhyāya. Fol. 49*b* is left blank.

A gloss on the Tattva Prakāśikā, a Dvaita work.

Beginning:

यादवार्यगुरून्नत्वा तदुपादिष्टमार्गतः ।
यान्यत्रागम्यवाक्यानि तेषां भावो निरूप्यते ॥

अस्याकारवाच्यस्य विष्णोर्मानं ज्ञानं येषां ते । अधिकारिणोऽमास्तान् लाति गृह्णातीति अमलस्तम् । न विद्यते मलं त्वगादिकं येषां तेऽमला मुक्ताः । तेऽस्य उपासकतया सन्तीत्यमलस्तममलमिति वार्थः । आद्यपद्ये भगवत्पादैः किं क्रियत इत्यत आद्यपद्यमवतारयति—अविद्यापटलपिहितनयनैरिति ।

Colophon:

इति श्रीमद्यदुपत्याचार्यपादाराधकेन श्रीनिवासेन कृतायां, श्रीतत्त्वप्रकाशिकाविषयवाक्यार्थविवृतौ प्रथमाध्यायस्य प्रथमः पादः ।

End:

ब्रह्मोपासकस्यान्यादिप्राप्तिः कथमिह शङ्क्यते अथः (?) ।

Colophon:

इति प्रथमाध्यायस्य द्वितीयः पादः ।

D. No. 17299

Pages, 72. Lines, 7 8 on a page. Nandinagari. Injured. Extent, 1,071 granthas.

ब्रह्मसूत्रभाष्यव्याख्या—दीपिका by जगन्नाथयति ।

BRAHMASŪTRABHĀṢYAVYĀKHYĀ—DĪPIKĀ by Jagannātha-yati.

Begins on fol. 8*a* of the MS. described under D. No. 11459.

Same work as that described under D. No. 4814.

Incomplete. Contains the 4th pāda in 3rd Adhyāya.

D. No. 17300

Palm leaf. 15½ × 1½ inches. Pages, 275. Lines, 8 and 9 on a page. Nandinā-gari. Slightly injured. old. Extent, 4,950 granthas.

बृहतीसहस्रपारावारः by रघुनाथयति ।

BṚHATĪSAHASRAPĀRĀVĀRAḤ by Raghunāthayati.

Incomplete. Contains from the 6th Khaṇḍa to the end of the 10th Khaṇḍa in 4th pariccheda.

Foll. 139 and 140*a* contain Sahasranāmavyākhyā.
Foll. 141*a* to 143*a* contain mantrās with chandas.
A religious work of the Dvaita school of philosophy.

Beginning :

अथाऽस्म · · · · · सपर्यतः । उभेस समरोदसी । त्वं मे तदधारयः । कृष्णासु रोहिणीषु च । परुष्णीषु रुशत्पयः । बलं देवीति इदेव्यौ । उभे इति रोहिणी इति । द्यावापृथिव्यौ । सपर्यगः । परिचर्याकर्मसु पाठात्परिचरतः । द्यावापृथिवीभ्यः । परुष्णीषु नदीषु च । तत्पयः उदकजातम् ।

Colophon :

इति बृहतीसहस्रपारावारे षष्ठः खण्डः समाप्तः ।

End :

यूयं पाथः स्वस्तिभिः सदा न इत्यादिना श्रूयमाणसर्वप्रहरणा-युधमूर्तिरत्र । १००० । 'नलाभो जीवितात्पर' इत्यभियुक्तोक्तेः पुरुषार्थेषु आयुष अभ्यर्हितत्वात्सर्वप्रहरणायुधशब्देन प्रार्थितमपि पुनरायुधशब्देन प्रार्थनं युक्तं पूर्णायुष्यं भूयादिति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमल्लक्ष्मीनारायणतीर्थ-पूज्यपादानां शिष्येण श्रीमद्रघुनाथयतिना विरचितायां तत्त्वसाराख्यायां कर्मनिर्णयटीकाभावविवृतौ बृहतीसहस्रपारावारे चतुर्थपारिच्छेदे दशमः खण्डः समाप्तः ।

॥ ग्रन्थश्चायं समाप्तः ॥

The scribe adds :—

अनेन बृहतीसहस्रव्याख्यानवार्क्किचनलेखनेनास्मन्मुख्यगुर्वन्तर्गतमध्व-वल्लभश्रीविङ्कटेशरूपी श्रीलक्ष्मीनृसिंहः प्रीयताम् ।

ज्ञानवैराग्यभक्तीनां निधिं लक्ष्मीनिधिं परम् ।
रघुनाथमुनेः पुत्रं मम देशिकमाश्रये ॥

D. No. 17301

Pages, 14. Lines, 6 on a page. Telugu. Slightly injured. Extent, 126 granthas.

विष्णुसर्वोत्तमम् ।

VIṢṆUSARVOTTAMAM.

Begins on fol. 64*a* of the MS. described under D. No. 2191.

Similar to the work described under R. No. 3289.

Incomplete. Contains Adhyāyās 14 to 16 complete 17 incomplete.

Beginning :

दिलीपो रोमशं प्रति—

भगवन्सर्वमाचक्ष्व हरिभक्तिसुधार्णवम् ।
पूर्वं कैलासशिखरे शङ्करो लोकपूजितः ॥
अनेकऋषिशापेभ्यो लिङ्गाकारमवाप्य हि ।
तादृशः शङ्करो ब्रह्मन् कथं विष्णुमवाप्नुयात् ॥
इदमाचक्ष्व विप्रेन्द्र शङ्करस्य महात्मनः ।

Colophon :

इति विष्णुसर्वोत्तमे उमामहेश्वरसंवादे चतुर्दशोऽध्यायः ।

End :

इति ब्रुवन्तं देवेशो नत्वा परमहर्षितः ।
जगाम वायुमार्गेण वायुपुत्रो महाबलः ॥
पुरुषाख्यमृगं भीमो यज्ञरक्षार्थमागत. ।
अन्वेषितोऽभूत्तं दृष्ट्वाऽजनयः प्रहृष्टधीः ।

D. No. 17302

Page, 1. Lines, 5 on a page. Telugu. Slightly injured. Extent, 24 granthas.

हयग्रीवगायत्रीमन्त्रः ।

HAYAGRĪVAGĀYATRĪMANTRAḤ.

Begins on fol. 62*a* of the MS. described under D. No. 2191.

Similar to the work described under D. No. 7701.

Complete.

Beginning :

श्रीमत्कीलकवत्सरे नभसि तत्पक्षे च तद्वासरे
चात्रेयान्वयतिमलार्यशिशुना श्रीयादवाद्रिप्रभोः ।

पादाम्भोरुहयुग्मके मृदुकथसंफुल्लसूनार्पितं · · ·
माहात्म्यात्मकदाम अर्पितमहो भाग्याय हृद्याय मे ॥

श्रीरङ्गराजगुरवे नमः । ओं सुदर्शनपुरुषाय नमः । ओं ज्वालानृसिंहाय नमः । ओं हयग्रीवाय नमः ।

End :

भूर्भुवः सुवरोमिति दिग्बन्धः । ध्यानम्—विशुद्धज्ञान । ओं ह्रीं हयग्रीवाय वागीश्वराय नमः । मम विद्यां बोधय शोभय च स्वाहा । जपं कृत्वा पूर्ववन्न्यासः भूर्भुवःसुवरोमिति दिग्विमोकः ।

D. No. 17303

Palm leaf. 11 × 2 inches. Pages, 104. Lines, 9 on a page. Kannada. Injured. Old. Extent, 800 granthas.

शब्दानुशासनम् by शाकटायन ।

ŚABDĀNUŚĀSANAM by Śākaṭāyana.

Same works as that described under D. Nos. 1527 and 1273.

Contains Sūtrapāṭha, Dhātūpāṭha, Gaṇapāṭha. Complete.

D. No. 17304

Palm leaf. 7 × 2 inches. Pages 52. Lines, 11–13 on a page. Telugu. Slightly injured. Old. Extent, 358 granthas.

शब्दमञ्जरी ।

ŚABDAMAÑJARĪ.

Same work as that described under D. No. 1554.

Complete.

D. No. 17305

Pages, 3. Lines, 6 on a page. Grantha. Injured. Extent, 30 granthas.

श्रीमुष्णनाथप्रार्थनाषोडशी ।

ŚRĪMUṢṆANĀTHAPRĀRTHANĀṢOḌAŚI.

Begins on fol. 1*a* of the MS. described under D. No. 3546, wherein this work has been mentioned as Prārthanāṣoḍaśī.

Same work as that described under D. No. 10538.

Complete.

D. No. 17306

Pages, 6. Lines, 7 on a page. Grantha. Good. Extent, 80 granthas.

विभागविषयवचनानि ।

VIBHĀGAVIṢAYAVACANĀNI.

Begins on fol. 33 *a* of the MS. described under D. No. 3546.

Incomplete.

This is a portion of the Vyavahārakāṇḍa of the Yājñavalkyasmṛti with the commentary of Vijñāneśvara, which has been described under D. No. 2682.

Beginning :

अथ विभागतद्भावनिर्णयहेतवः । तत्र याज्ञवल्क्यः ।

विभागनिर्णये ज्ञाते बन्धुसाक्ष्यभिलेखितैः ।
विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥

यौतकैः पृथक्कृतैः । विभागग्रहणं धर्माणामपि प्रदर्शनार्थम् । अत एव नारदः ।

विभागधर्मसन्देहे दायादानां विनिर्णयः ।
ज्ञातिभिर्बन्धुलेख्येन पृथक्कार्यप्रवर्तनात् ॥

End :

गोपालभाष्ये —

औरसो धर्मपत्नीजः पुत्रिकापुत्रकृत्रिमौ ।
अपविद्धपतिश्चैव दौहित्रो भ्रातृपुत्रकः ॥

पत्युःस्वसा च स्वस्त्रीया स्वसा स्वस्त्रिय एव च ।
भ्रातृपुत्रश्च जामाता सपिण्डाः सोदकाः क्रमात् ॥

D. No. 17307

Pages, 3. Lines, 6 on a page. Grantha. Injured. Extent, 20 granthas.

ग्रहणश्राद्धनिर्णयः ।

GRAHAṆAŚRĀDDHANIRṆAYAḤ.

Begins on fol. 38 *a* of the MS. described under D. No. 3546.

Fol. 39 *a* contains Sapiṇḍikaraṇa nirṇaya ślōka.

Incomplete.

On the Śrāddas (ceremonies) to be performed during eclipses.

Beginning :

चतुर्स्त्रियामान्त्राश्रीयात्प्रागर्केन्दोर्ग्रहे क्रमात् ।
अस्तोदिते रवौ चन्द्रे बालादिः प्रहरद्वये ॥

End :

मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च ।
आज्यहोमेषु सर्वत्र नाचामेदिति च स्मृतिः ॥

D. No. 17308

Pages, 2. Lines, 8 on a page. Grantha. Injured. Extent, 18 granthas.

रामाष्टोत्तरशतनामस्तोत्रम् ।

RĀMĀṢṬOTTARAŚATANĀMASTOTRAM.

Begins on on fol. 44 *a* of the MS. described under D. No. 3546.

Same work as that described under D. No. 8974.

Complete.

D. No. 17309

Pages, 4. Lines, 6 on a page. Grantha. Injured. Extent, 33 granthas.

विरक्तसंन्यासविषयवचनानि ।

VIRAKTASANNYĀSAVIṢAYAVACANĀNI.

Begins on fol. 56 *a* of the MS. described under D. No. 3546.

Incomplete.

Contains some texts relating to *Sannyasa* after renouncing worldly desires.

Beginning :

वर्णाश्रमधर्मे पराशरः—

गृह्णीयात्सततं विद्वान्पात्रं चैव कमण्डलुम् ।
आसनं दारवं प्रोक्तं स्वहस्तचतुरङ्गुलम् ॥
कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम् ।
जलपात्रं पवित्रं च खानित्रं च कृपाणिकाम् ॥

End :

सर्वसङ्गविहीनो यो यतिर्भवति माठकः ।
तस्य जन्मैव नास्तीह चण्डालात्कुलगर्हितात् ॥

D. No. 17310

Pages, 7. Lines, 7 on a page. Grantha. Injured. Extent, 80 granthas.

भूस्तुतिः by वेदान्तदेशिक ।

BHŪSTUTIḤ by Vedānta deśika.

Begins on fol. 48*a* of described under D No. 3546.

Same work as that described under D No. 9642.

Complete.

D. No. 17311

Pages, 2. Lines, 5 on a page. Grantha. Injured. Extent, 12 granthas.

नवग्रहस्तोत्रम् ।

NAVAGRAHASTOTRAM.

Begins on fol. 17 (*a*) of the MS. described under D. No. 3546.

Same work as that described under D. No. 9530 but the order of Stotras and phalaśruti are different.

Complete.

D. No. 17312

Pages. 2. Lines, 6 on a page. Telugu. Slightly injured. Extent, 9 granthas.

वशीकरसुदर्शनमहामन्त्रः ।

VAŚĪKARASUDARŚANAMAHĀMANTRAḤ.

Begins on fol. 62*b* of the MS. described under D. No. 2191 wherein this work has been omitted to be mentioned in the list of other works given therein.

Similar to the work described under D. No. 7527.

Complete.

Beginning :

अस्य श्रीसुदर्शनमहामन्त्रस्य अहिर्बुध्न्यभगवान् ऋषिः । गायत्री छन्दः । वशीकरसुदर्शनो देवता । क्लीं बीजम् । ह्रीं शक्तिः । क्रों कीलकं । सर्वजनवशीकरणार्थे जपे विनियोगः । अचक्रायांगुष्ठाभ्यां नमः । विचक्राय तर्जनीभ्यां नमः । सुचक्राय मध्यमाभ्यां नमः । सत्य-क्रायानामिकाभ्यां नमः । पञ्चचक्राय कनिष्ठिकाभ्यां नमः । ज्वालाचक्राय करतलकरपृष्ठाभ्यां नमः ।

End :

पाशाङ्कुशधरं देवं परिपूर्णकृपाकरम् ।
वशीकरणबाणाय सम्यक्सौदर्शनाय च ॥

रक्तवस्त्रधरं देवं रक्तमाल्यानुलेपनम् ।
वन्देऽहं वक्ष्यमाणाय चक्रराजाय ते नमः ॥

ओं आं सहस्रार हुं फट् । क्रों क्लीं ह्रीं क्लीं आं सहस्रार हुं फट् । क्रों ओं हुं फट् स्वाहा । जपम् ॥ १००० ॥ तर्पणं ॥ २०० ॥ मधुशर्करसर्षपतिलचन्दनमिश्रेण तीर्थेन यन्त्रपादस्थाने तर्पणं कुर्यात् । पायसं बदरीप्रमाणं आहुतिं कृत्वा अर्चनासहस्रं कुर्यात् ।

D. No. 17313

Pages, 2. Lines, 9 on a page. Grantha. Slightly injured. Extent 36 granthas.

अम्मालसन्ततिक्रमः ।

AMMĀLSANTATIKRAMAḤ.

Begins on fol. 17*a* of the MS. described under D. No. 3546.

Complete.

Contains verses in praise of the descendants of Sri Ammaḻ, a Srivaiṣṇavaguru.

Beginning :

वत्सान्ववायतिलकं वात्सल्यादिगुणार्णवम् ।
श्रीनृसिंहगुरोः सूनुं नृसिंहार्यमहं भजे ॥
श्रीनृसिंहगुरुं वन्दे श्रीभाष्यामृतसागरम् ।
श्रीनिवासगुरोः सूनुं वत्सवंशैकमौक्तिकम् ॥

End :

श्रीवत्सवंशकलशाम्बुधिपूर्णचन्द्रं
श्रीशैलदेशिकपदाब्जयुगद्विरेफम् ।
वात्सल्यदुग्धजलधिं वरदार्यसूनुं
श्रीश्रीनृसिंहगुरुवर्यमहं भजामि ॥

श्रीनृसिंहगुरोः सूनुं श्रीवत्सकुलभूषणम् ।
श्रीनिवासगुरुं वन्दे वेदान्तद्वयदेशिकम् ॥

D. No. 17314

Pages, 18. Lines, 5 on a page. Telugu. Good. Extent 100 granthas.

रामायणम् by वाल्मीकि ।

RĀMĀYAṆAM by Vālmīki.

Begins on fol. 3 *a* of the MS. described under D. No. 9110.

Same work as that described under D. No. 1806.

Contains Bālakāṇḍa 1st chapter only.

Incomplete.

Fol. 2 contains some introductory stanzas taken from the Rāmāyaṇa.

D. No. 17315

Pages, 8. Lines, 6 on a page. Telugu. Slightly injured. Extent, 105 granthas.

वृत्तिसिद्धरूपसंग्रहः ।

VṚTTISIDDHARŪPASAṄGRAHAḤ.

Begins on fol. 1 *a* of the MS. described under D. No. 1648.

Same work as that described under D. No. 1557.

Contains Samāsacakra complete.

D. No. 17316

Pages, 14. Lines, 14 on a page. Telugu. Slightly injured. Extent, 588 granthas.

वेङ्कटगिरिमाहात्म्यम् ।

VEṄKAṬAGIRIMĀHĀTMYAM.

Begins on fol. 17 *a* of the MS. described under D. No. 2505.

Same work as that described under D. No. 2522.

Contains Adhyāyas 1 to 30. A portion of Pādmapurāṇa.

D. No. 17317

Palm leaf. 10¾ × 1¼ inches. Pages, 13. Lines, 6 on a page. Telugu. Slightly injured. Old. Extent, 75 granthas.

वरलक्ष्मीव्रतकल्पः ।

VARALAKṢMĪVRATAKALPAḤ.

Begins on fol. 1*a*. The other work herein is Vināyakavratakalpaḥ 8 (*a*).

Same work as that described under D. No. 8470.

Complete.

D. No. 17318

Pages, 12. Lines, 5 on a page. Telugu. Slightly injured. Extent, 60 granthas.

विनायकव्रतकल्पः ।

VINĀYAKAVRATAKALPAḤ.

Begins on fol. 8*a* of the MS. described under previous D. No. 17317.

Same work as that described under D. No. 8499.

Incomplete.

D. No. 17319

Pages, 2. Lines, 17 on a page. Telugu. Slightly injured. Extent, 30 granthas.

धरणीस्तोत्रमन्त्रः ।

DHARAṆĪSTOTRAMANTRAḤ.

Begins on fol. 57 *a* of the MS. described under D. No. 2043.

Complete.

Contains the 108 significant names, with which Śrī Dharaṇī praised Śrī Nārayaṇa, as stated in the Varāha Purāṇa.

Beginning :

अस्य श्रीधरणीस्तोत्रमन्त्रस्य यज्ञवराह ऋषिः अनुष्टुप् छन्दः । श्रीमधुसूदनो देवता । श्रीमन्नारायणप्रीत्यर्थे धरणीस्तुतिनारायणाष्टोत्तरशत-दिव्यनामस्तोत्रमन्त्रपठनं करिष्ये ।

End :

मद्भक्तैर्मद्गताप्राणैर्मयि संन्यस्तबुद्धिभिः ।
स्तोत्रमेतद्विशेषेण पठितव्यं त्रिसन्धिषु ॥

Colophon :

इति श्रीवराहपुराणे श्रीधरणी-यज्ञवराहसंवादे
धरणीस्तुतिनारायणाष्टोत्तरशतदिव्यनाम-
स्तोत्रं सम्पूर्णम् ।

D. No. 17320

Pages, 4. Lines, 16 on a page. Telugu. Slightly injured. Extent, 75 granthas.

भागवतम् ।

BHĀGAVATAM.

Begins on fol. 50 *a* of the MS. described under D. No. 2043. Contains Adhyāyas 30 and 31 in 11th skandha. Incomplete. Same work as that described under D. No. 2161.

D. No. 17321

Pages, 2. Lines, 19 on a page. Telugu. Slightly injured. Extent, 50 granthas.

अष्टोत्तरशतदिव्यदेशनामानि ।

AṢṬOTTARAŚATADIVYADEŚANĀMĀNI.

Begins on fol. 32 *a* of the MS. described under D. No. 2043.

Wants beginning. Otherwise complete.

Same work as that described under D. No. 5200

D. No. 17322

Pages, 20. Lines, 5 on a page. Telugu. Good. Extent, 181 granthas.

चिदम्बरगुरुस्तवः ।

CIDAMBARAGURUSTAVAḤ.

Begins on fol. 62 *a* of the MS. described under D. No. 13090.

Incomplete.

Similar to the work described under D. No. 11286.

Beginning :

वन्देऽहं परमानन्दमन्दिरं सुन्दराननम् ।
साम्बं जटाम्बरालम्बिशम्बरं श्रीचिदम्बरम् ॥

अस्ति भाति प्रियं चेति वस्तु प्रस्तूयते बुधैः ।
तदस्तु स्वस्ति विस्तारं वस्तु चैदम्बरं मुहुः ।

आविरस्तु महात्मा मे पुरतः श्रीचिदम्बरः ।
मन्दहासमुखाम्भोजः सान्त्वयन्प्रीतिपूर्वकम् ॥

नमोऽस्तु मल्लारिसुधीन्द्रपुत्र ।
नमोऽस्तु विख्यातमहाचरित्र ।
नमोऽस्तु भक्तस्तुतिपात्रगात्र
नमो नमस्तेऽस्तु मुरारिमित्र ॥

End :

यामे यामे विक्रमति कलाचित्तयोगानुभूता
पापोत्तापप्रशमनविधौ शीतभानोर्मरीचिः ।
सारोदारा वरमुनिजनानन्दनानन्दरूपा
पूर्णापर्णावदिह भुवि सा विद्धि चैदम्बरीति ॥
गन्धालङ्कृतफालभागममलस्मेराननाम्भोरुहं
कारुण्याञ्चितवीक्षणं मृदुगिरं कान्तोज्वलाङ्गश्रियम् ।
सौवर्णोत्तमरत्नभूषणलसन्मा . . . . . ।
. . . . ॥

D. No. 17323

Pages, 12. Lines, 8 on a page. Grantha. Good. Extent, 60 granthas.

गुरुपरम्परास्तोत्रम् ।

GURUPARAMPARĀSTOTRAM.

Begins on fol. 21 *a* of the MS. described under D. No. 9704.

Complete.

Similar to the work described under D. No. 5234.

Beginning :

श्रीस्तनाभरणं तेजः श्रीरङ्गशयमाश्रये ।
चिन्तामणिमिवोद्वान्तमुत्सङ्गेऽनन्तभोगिनः ॥
नमः श्रीरङ्गनायक्यै यद्भ्रूविभ्रमभेदतः ।
ईशेशितव्यवैषम्यनिम्नोन्नतमिदं जगत् ॥

* * * * . *

नौमि नाथमुनिं नाम जीमूतं भक्त्यवग्रहे ।
वैराग्यभगवत्तत्त्वज्ञानभक्त्यभिवर्षकम् ॥

End :

शठरिपुयतिराट्श्रीरम्यजामातृयोगि-
प्रवरगगनभूभृद्योगिमज्ञातभक्तिम् ।
शमदमगुणपूर्णं नौमि रामानुजाख्यं
परिचितनिगमान्तद्वन्द्वमार्ये यतीन्द्रम् ॥
कान्तोपयन्तृमुनिवर्यकृपानिवास-
श्रीवानशैलयतिराट्पदपद्महंसम् ।
त्रय्यन्तयुग्मविशदीकरणप्रवीणं
रामानुजं यतिपतिं शिरसा नमामि ॥

D. No. 17324

Pages, 10. Lines, 6 on a page. Grantha. Injured. Extent, 90 granthas.

शैवपूजाविधिः ।

ŚAIVAPŪJĀVIDHIḤ.

Begins on fol. 60 *a* of the MS. described under D. No. 15840.

Wants beginning and end.

Similar to the work described under D. No. 5510.

Beginning :

स्वाधार इति । स्वाधारे मूलाधारे गतमानसः प्राप्तमनाः प्रथममूलाधारगतभावनायुक्तमना इत्यर्थः । शिवमनोः शक्त्यात्मकः शिवमनोर्मूलमन्त्रस्य शक्त्यात्मकः सामर्थ्ययुक्तस्वरूपः । प्रासादमन्त्रजपानुष्ठानेनावाहनादिकर्मकरणे दक्ष इत्यर्थः । मात्रादीप्तिकलेश्वरकर्मगतो मात्रा अकारोकारमकारबिन्दुनादम् । एतेषां स्थानानि यथाक्रमं हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्राणि । भाभ्यो मात्राभ्यः ।

End :

ब्रह्मरन्ध्रोपरि शक्त्यादिकलाचतुस्थानमनाहतः शिवाधिष्ठितं . . . . न्तान्मन्य . . . मस्थानभूतद्वादशान्तं स्थानं परशिवाधिष्ठितमेवं लयान्तं मूलाणुयः दीक्षित उच्चरति मूलमन्त्रोच्चारक्रमेण . . . . . ।

D. No. 17325

Palm leaf. $4\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 44. Lines, 9 on a page. Nandināgarī. Slightly injured. Old. Extent, 247 granthas.

ब्रह्मसूत्रम् by व्यास ।

BRAHMASŪTRAM by Vyāsa.

Complete.

Same work as that described under R. No. 1429 (*c*).

D. No. 17326

Pages, 230. Lines, 7 and 8 on a page. Grantha. Slightly injured. Extent, 2,695 granthas.

चम्पूभारतव्याख्या—सरस्वतीविलासः by नृसिंहाचार्यः ।

CAMPŪBHĀRATAVYĀKHYĀ-SARASVATĪVILĀSAḤ by Nṛsimhācārya.

Begins on fol. 10 *a* of the MS. described under D. No. 12243.

Contains stabakās 1 and 2 comp'ete. 3 incomplete.

Same works as that described under D. No. 12248.

D. No. 17327

Pages, 22. Lines, 8 on a page. Grantha. Slightly injured. Extent, 260 granthas.

मन्त्रदेवताप्रकाशिका ।

MANTRADEVATĀPRAKĀŚIKĀ.

Begins on fol. 1 *a* of the MS. described under D. No. 990.

Contains paṭalās 2 and 16 only. Complete.

Same work as that described under D. No. 7997.

D. No. 17328

Palm leaf. $14 \times 1\frac{1}{4}$ inches. Pages, 227. Lines, 7 on a page. Telugu. Injured. Old. Extent, 3,200 granthas.

चम्पूभारतम् by अनन्तदेव ।

CAMPŪBHĀRATAM by Anantadeva.

Complete.

Same work as that described under D. No. 12244.

D. No. 17329

Palm leaf. $17\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 38. Lines, 9 on a page. Nandināgarī. Injured. Old. Extent, 900 granthas.

मालतीमाधवम् by भवभूतिः ।

MĀLATĪMĀDHAVAM by Bhavabhūti.

Incomplete. Breaks off in 7th act.

Same work as that described under D. No. 12589.

D. No. 17330

Pages, 20. Lines, 10 on a page. Extent, 300 granthas.

आपस्तम्बपूर्वप्रयोगः ।

ĀPASTAMBAPŪRVAPRAYOGAḤ.

Begins on fol. 1*a* of the MS. described under D. No. 1363.

Incomplete.

Similar to the work described under No. 3685.

Beginning :

कर्मारम्भमुहूर्तः सुमुहूर्तोऽस्त्वित्यनुगृह्णन्तु ।
जाते पुत्रे पितुः स्नाते सचेलं तु विधीयते ।
जातकर्म ततः कुर्याच्छ्राद्धमभ्युदयं तथा ॥
यः कर्मलमसाद्गुण्यमभिवाञ्छति स द्विजः ।
प्रागेवोदकशान्तिं च गृहयज्ञं च कारयेत् ॥

दर्भेष्वासीनः * * सङ्कल्प्यादौ विघ्नेश्वरपूजां कुर्यात् । अश्विनीनक्षत्रे मेषराशौ जातं कुमारं जातकर्मणा संस्करिष्ये ।

End :

विवत्तातेत्यृचा पुंसां बध्नीयाद्दक्षिणे करे ।
तथा वामकरे स्त्रीणां बृहत्सामेति बन्धनम् ॥
आग्रयणे इन्द्राग्नि विश्वेदेवा द्यावापृथिवी इति प्रधानाः ।

D. No. 17331

Pages, 14. Lines, 7 on a page. Grantha. Injured. Extent, 136 granthas.

सूत्रार्थप्रकाशिका ।

SŪTRĀRTHAPRAKĀŚIKĀ.

Begins on fol. 22 *a* of the MS. described under D. No. 13631.

Contains 5 to 8 Paṭalas, incomplete. Foll. 25 to 28 contain jyautiṣa viṣayaślokas.

A work on Horoscopy.

Beginning :

अनुपातनमिति ।

अनुपातत्सवै ह्रासो भागपर्यायसम्भवः ।
विलग्नाष्टमेशाभ्यां य आयुर्निर्णयः कृतः ॥
सोऽष्टमाधीश्वरौ द्वौ चेत्तयोर्यस्त्वष्टमस्थितः ।
तं विहायान्यराशिस्थमारभ्यायं प्रयुज्यते ॥

Colophon :

इति सूत्रार्थप्रकाशिकायामायुर्निर्णयो नाम पञ्चमः पटलः ।

End :

स्वोच्चमित्रस्वत्रिकोणसंस्थितैर्योग उच्यते ।
तद्ग्रहैर्योग . . . . ज्ञेयं नैसर्गिकं बलम् ॥

D. No. 17332

Pages, 15. Lines, 6 on a page. Grantha. Good. Extent, 50 granthas.

गुरुपरम्परास्तोत्रम् ।

GURUPARAMPARĀSTOTRAM.

Begins on fol. 1*a* of the MS. described under D. No. 10569.

Complete.

Similar to the work described under D.No. 5234. Fol 7 *b* left blank.

Beginning :

गोविन्दपादाम्बुजचञ्चरीकं
लोकार्गलध्वनिगमान्तयुगं सुशीलम् ।
शेषाद्रिनाथकरुणावरुणालयं तं
शेषार्यवेङ्कटयतीश्वरमाश्रयेऽहम् ॥

End :

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

D. No. 17333

Pages, 14. Lines, 7 on a page. Grantha. Good. Extent, 196 **granthas.**

वासवदत्ताव्याख्या ।

VĀSAVADATTĀVYĀKHYĀ.

Begins on fol. **27** *a* of the MS. described under D. No. 2702.

Incomplete. In the beginning two leaves were lost and wants end.

Same work as that described under D. No. 12417.

D. No. 17334

Pages, 12. Lines, 8 on a page. Grantha. Good. Extent, 110 **granthas.**

शेषामरः ।

ŚEṢĀMARAḤ.

Begins on fol. 64 *a* of the MS. described under D. No. 1526.

Contains Simhādrivarga only complete.

Same work as that described under D. No. 1773.

Fol. 70 contains Muhūrtakārikās.

D. No. 17335

Pages, 12. Lines, 8 on a page. Grantha. Slightly injured. Extent, **144** granthas.

धर्मशास्त्रवचनानि ।

DHARMAŚĀSTRAVACANĀNI.

Begins on fol. 68 *a* of the MS. described under D. No. 2411.

Complete.

Similar to the work described under D. No. 2765.

Beginning :

अग्रस्थूलं भवेन्नारी मूलस्थूलं नपुंसकम् ।
मूलादग्रसमं चापि पुमान्गर्भः प्रकीर्तितः ॥
मासिकेषु सपिण्डेषु आब्दिकेषु तथैव च ।
संवत्सरविमोके च न कुर्यात्तिलतर्पणम् ॥
दर्शे तिलोदकं पूर्वं पश्चाद्द्यान्महालये ।
प्रात्याब्दिकेऽनुमासे च परेऽहनि तिलोदकम् ॥

End :

यतिहस्ते जलं दद्याद्भैक्षं दद्यात्पुनर्जलम् ।
तदन्नं मेरुसङ्काशं तत्तोयं सागरोपमम् ॥

सुवृत्तो वासुवृत्तो वा मूर्खो वा पण्डितोऽपि वा ।
काषायदण्डमात्रेण यतिः सर्वत्र पूज्यते ॥

D. No. 17336

Page, 1. Lines, 9 on a page. Telugu. Good. Extent, 4 granthas.

शाबरमन्त्रः ।

ŚĀBARAMANTRAḤ.

Begins on fol. 84 *b* of the MS. described under D. No. 21.

It seems that this Mantra might have been taken from Śābaracintāmaṇi which gives the details connected with certain Mantras composed in Sanskrit mixed up with the Dravidian Languages.

Complete.

Beginning and End :

शाबरम् । ओं प्रचण्डदेवता ब्रह्माण्डबन्धनस्तोत्रमन्त्रबडबानलस्य देवता । आखण्डल ऋषिः । आनन्दस्तोत्रेशा षोडशबन्धनप्रयोगस्य नामदेव ऋषिः । गायत्री छन्दः । जपा अधोमुखे विनियोगः । वेगो मुक्ता पञ्चभूतात्मा इष्टदेवता प्रच्छन्नवेषस्य पाणिं प्रच्छन्नय । मारु मारु । दारु दारु ।

D. No. 17337

Palm leaf. 16¾ × 1⅜ inches. Pages, 45. Lines, 8 on a page. Grantha. Good. Old. Extent, 518 granthas.

उदकशान्तिमन्त्रकारिका ।

UDAKAŚĀNTIMANTRAKĀRIKĀ.

Complete.

Similar to the work described under D. No. 3573.

Beginning :

सावित्रवेदादि कृणुष्वपाज इन्द्रोऽनुवाकं यत इत्युभे च ।
महान्सजोषाद्यपुरः सदादीन् रक्षोहणः पञ्चभिरायुषश्च ॥

यावां च यो वां यशसा ऋताषाट् तिस्रो नमो अस्त्वयपश्चवोढाः ।
आशुः शुशा शश्वतमेता ममाग्ने मन्वे समीचीशतम्मतमुक् च ॥
इन्द्रो दधीचोऽप्यथ चक्षुषश्च प्राणोऽथ तिस्रो च तथाहमस्मि ।
ता अग्निऋध्यास्म नवो नवोऽग्निर्नक्षत्रमन्त्रा उपहोममन्त्राः ॥
दधिक्राव अपोह्यच्चिद्धिरण्याः पवमानभूश्च

End :

सनः पर्षदतिदुर्गाणि विश्वा क्षामद्देवोऽतिदुरितात्यग्निः हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । इति जपित्वा देवस्यत्वेति प्रोक्षणम् । तदुदकं प्राश्य । आप उद्वा उ भेषजीरापो अमिवचातनीः । आपः, सर्वस्यभेषजम् । . . . . स्तास्ते कृण्वन्तु भेषजम् भेषजमेवास्मै-करोति । सर्वमायुरेति ।

ஜயவருஷம் தை மாதம் 20ந் தேதி சனிக்கிழமை உத்தராஷ்டி லக்ஷ்மணமாய் எழுதி முடிந்தது.

D. No. 17338

Pages, 2. Lines, 5 on a page. Grantha. Injured. Extent, 9 granthas.

रामायणमन्त्रः ।

RĀMĀYAṆAMANTRAḤ.

Begins on fol. 30*a* of the MS. described under D. No. 9629.

Complete.

On a sacred spell connected with the Rāmāyaṇa.

Beginning :

अस्य श्रीरामायणमहामन्त्रस्य वाल्मीकिर्भगवानृषिः । अनुष्टुप् छन्दः । श्रीसीतारामचन्द्रो देवता । अं बीजम् । क्रिया शक्तिः । ह्रीं कीलकम् । श्रीसीतारामचन्द्रप्रीत्यर्थे जपे विनियोगः ।

End :

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥

D. No. 17339

Pages, 2. Lines, 6 on a page. Grantha. Injured. Extent, 10 granthas.

सन्ध्यावन्दनमन्त्रः ।

SANDHYĀVANDANAMANTRAḤ.

Begins on fol. 31*a* of the MS. described under D. No. 9629.

Complete.

Similar to the work described under D. No. 7482.

Beginning :—

अस्य श्रीसन्ध्यावन्दनमहामन्त्रस्य सान्दीपिनिभगवानृषि । अनुष्टुप् छन्दः । ब्रह्मा देवता । शोभनवक्त्रे बीजम् नीलग्रीवायेति शक्तिः । त्रिणेत्रायेति कीलकम् । (मम) समस्तपा(प)क्षयार्थे सन्ध्यावन्दने जपे विनियोगः ।

End :

कृत्वा सन्ध्यामभिध्यायेन्नीलग्रीवां सशोभनाम् ।
वरदाभयहस्ताभां त्रिणेत्रां च त्रिशेखराम् ॥
प्रणवं परमात्मानं जपित्वाभक्तिसंयुतः ।
आत्मना तामभिध्यायेत्प्रकुर्याद्वन्दनं बुधः ॥

अं, ऐं, उं, क्लिं, मं, सौः, इति द्वादशवारं जपेत् । प्रणवं जपेत् ।

D. No. 17340

Pages, 8. Lines, 6 on a page. Grantha. Injured. Extent, 42 granthas.

महान्यासपूजाविधिः ।

MAHĀNYĀSAPŪJĀVIDHIḤ.

Begins on fol. 33*a* of the MS. described under D. No. 9629 wherein it is mentioned as Śivapūjā in the list of works given therein.

Similar to the work described under D. No. 8672.

Beginning :

सद्योजातं प्रपद्यामि ।

संवर्ताग्नितटित्प्रदीप्तकनकप्रस्पर्द्धितेजोऽरुणं
बालेन्दुद्युतिमिश्रितं सुदर्शनपाङ्गासिताभाधरम् ।

अर्धेन्दुप्रललाटपिङ्गलजटाभारप्रवृत्तोरगं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥
वामदेवाय नमो नमः । ओं नमो भगवते रुद्राय पूर्वाङ्गमुखाय नमः ।

End :

चतुर्थीसहितायां तु सा तृतीया शुभप्रदा ।
अवैधव्यकरः स्त्रीणां पुत्रपौत्रप्रवर्धनम् ॥
स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन्सन्निधिं कुरु ॥

D. No. 17341

Pages, 8. Lines, 7 on a page. Grantha. Good. Extent, 75 granthas.

आतुरसंन्यासविधिः

ĀTURASANNYĀSAVIDHIḤ.

Begins on fol. 145*a* of the MS. described under D. No. 2166.

Complete.

Same work as that described under D. No. 2903 but the end different.

ओं नारायणायेति मन्त्रमुक्त्वा आवाहनाद्युपचारपूजां कुर्यात् । गन्धसंमिश्रपरमान्नबलिं नैवेद्यं दत्वा प्रदक्षिणनमस्कारान्कृत्वा स्नात्वाचम्य गृहमाविशेत् । एवं दशमदिनपर्यन्तं तर्पणपूजां बलिं च कुर्यात्

Colophon :

। आतुरसंन्यासविधिः समाप्तः ।

D. No. 17342

Pages, 9. Lines, 6 on a page. Grantha. Slightly injured. Extent, 6 granthas.

चाटुश्लोकाः ।

CĀṬUŚLOKĀḤ.

Begins on fol. 36*a* of the Ms. described under D. No. 1581.

Incomplete.

Similar to the work described under D. No. 12016.

Beginning :

. . . . . कान्त्यतिशायि सुशाटकं
निशितखड्गनिकृत्तनिशाटकम् ।

जनकभूदयितं हततातकं
हृदि भजे हि भुजाक्षिप(ता?)तातकम् ॥
सदारविन्देक्षणपन्नगारिं
सदारविन्देवपराधिरूढम् ।
दुर्दारविन्देवमधिष्ठितं . . .
मुदारविन्देयविचिन्त्यमूर्तिः ॥

End

अपगुणशतदोषं लक्षदोषप्रदोषं
अयुतनियुतदोषं क्षोणिशङ्कादिदोषम् ।
कुजरविशनिराहुर्जीवमन्दज्ञकेतु
भृगुजसकलदोषं हन्ति मध्याह्नलग्ने ॥

D. No. 17343

Pages, 7. Lines, 6 on a page. Grantha. Much injured. Extent, 30 granthas.

विदारणहनुमन्मन्त्रः ।

VIDĀRAṆAHANUMANMĀNTRAḤ.

Begins on fol. 6b of the MS. described under D. No. 2424 wherein it has been included in the general name of Pañcamukhavidāraṇa-hanūmanmantra in the list of other works.

This Mantra (together with the mystic diagram) which is in praise of Hanumān is considered to be efficacious in saving one from evil spirits and all possible dangers.

Complete.

Beginning :

ओं विदारणहनुमन्त, अञ्जना पुत्र, लङ्कापुरीदहन, राक्षसप्रलयकालानल वायुतनय, * * * * * नानाविधकृत्रिमान् छेदय छेदय । * * *
स्वविद्यामन्त्रयन्त्रतन्त्राणां प्रकटय हुं प्रयटच्च फट् स्वाहा ।

End :

बाह्यस्थपाशाङ्कुशशक्तिवेष्टितं
हनूमतो यन्त्रमभूतपूर्वकम् ।
रक्षाकरं मानुषचेतनानां
भूतग्रहादींश्च विषं च नाशयेत् ॥

D. No. 17344

Pages, 5. Lines, 6 on a page. Grantha. Much injured. Extent, 20, granthas.

पञ्चमुखहनुमन्मन्त्रः ।

PAÑCAMUKHAHANUMANMANTRAḤ.

Begins on fol. 9*b* of the MS. described under D. No. 2424, wherein this also is included in the list of other works under the general name like the previous one.

Similar to the work described under D. No. 6563.

This Mantra is addressed to Hanuman conceived as having five faces and various swords.

Complete.

Beginning:

अस्य श्रीपञ्चमुखहनुमन्मन्त्रस्य मार्कण्डेय ऋषिः । अनुष्टुप्छन्दः । पञ्चमुखविराड्रूपी परमात्मा हनुमान्देवता । मं बीजम् । स्वाहा शक्तिः। मर्कट मर्कट इति कीलकम् ।

End:

सर्वाण्येतान्यायुधानि धारयन्तं सदा कपिम् ।
प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् ॥
एवं ध्यात्वा जपेन्मन्त्रं सर्वकामार्थसिद्धये ।

* * * *

हरिमर्कटमर्कटमन्त्रमिदं परिलिख्यति लिख्यति भूमितले ।
यदि मुञ्चति मुञ्चति शृङ्खलिका अथ नश्यति नश्यति शत्रुकुले ॥

D. No. 17345

Pages, 10. Lines, 8 on a page. Grantha. Slightly injured. **Extent**, 150 granthas.

छन्दःसूत्रम् ।

CHANDASSŪTRAM.

Begins on fol. 29*a* of the MS. described under D. No. 1791.

Complete.

Same work as that described under D. No. 901.

Fol. 33*b* contains a small portion of Vṛttaratnākaram in Nandināgari.

D. No. 17346

Pages, 12. Lines, 8 on a page. Grantha. Slightly injured. Extent, 150 granthas.

चाटुश्लोकाः ।

CĀTŪŚLOKĀḤ.

Begins on fol. 34*a* of the MS. described under D. No. 1791, wherein this work has been omitted to be mentioned in the list of other works given therein.

A collection of witty verses.

Beginning :

विदुषां प्रमदाय सोपसर्गा गरुडाङ्कस्य मुदे गतोपसर्गा।
अपकारवती प्रियाय शम्भोरुपमेयं बहुधा बभूव चित्रम् ॥

भ्राता नृसिंहश्च तदा नृसिंहः
विद्या नृसिंहो द्रविणं नृसिंहः
स्वामी नृसिंहः सकलं नृसिंहः ॥

End :

ओं नमो भगवते नारसिंहाय हिरण्यकशिपुवक्षस्थलाविदारणाय त्रिभुवनावस्थाय सर्वभूतप्रेतपिशाचब्रह्मराक्षसविनाशनाय समस्तदोषान् हन हन धग धग छिद छिद चल जल कंप कंप, गन्ध गन्ध, शीघ्र शीघ्र, हुं, फट् स्वाहा, क्रों, विं क्षीं वस्त, स्रों, क्ष, क्षु, क्षां, अं, हुं, फट् स्वाहा—

D. No. 17449

Page, 1. Lines, 7 on a page. Telugu. Injured. Extent, 7 granthas.

बलातिबलामन्त्रः ।

BALĀTIBALĀMANTRAḤ.

Begins on fol. 1*a* of the MS. described under D. No. 4338, wherein this work has been mentioned as Bālāmantra in the list of other works.

Complete.

Beginning :

अनयोर्बलातिबलयोर्महामन्त्रयोर्विराट्ऋषिः । देवी गायत्री च्छन्दः । बलातिबल[ले][यो]देवता[ते] । अं बीजं, उं शक्तिः । हुं कीलकम् । मम बलातिबलयोः प्रसादसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादि न्यासः । भूर्भुवस्सुवरोमिति दिग्बन्धः ।

End :

ओं ह्रीं अतिबले ओं क्लीं क्लीं भर्ग · · · दात्मके, क्षुच्छ्रम—नाशिनि, ओं धियोयो नजाते ओं अतिबले हुं फट् स्वाहा—

D. No. 17450

Page, 1. Lines, 5 on a pages. Telugu. Injured. Extent, 4 granthas.

सुदर्शनमालामन्त्रः ।

SUDARŚANAMĀLĀMANTRAḤ.

Begins on fol. 1*b* of the MS. described under D. No. 4338, wherein this work has been mentioned as Atmapararaksāmālāmantraṣ in the list of other works.

Complete.

In the margin of the leaf has been written that the name of work is Ātmarakṣāmālāmantra, and Pararakṣāmālāmantra.

Smilar to the work described under D No. 7557.

Beginning and End :

ओं नमो भगवते महासुदर्शनाय महाचक्रराजाय महाज्वालाय महादीप्तस्वरूपाय सर्वतो मां रक्ष रक्ष महाबलाय हुं फट् स्वाहा । ओं नमो भगवते महासुदर्शनाय महाचक्रराजाय धग धगित धरां त्तर(?) ज्वल ज्वल प्रज्वल प्रज्वल प्रज्वल दुष्टदानव भयङ्कर ब्रह्मराक्षस भूचर खेचर अन्तरिक्षचर निशाचर काल सर्वकां स्वाहा ।

D. No. 17451

Pages, 22. Lines, 10 on a page. Telugu. Injured. Extent. 234 granthas.

प्रत्यङ्गिरासूक्तम् ।

PRATYAṄGIRĀSŪKTAM.

Begins on fol. 3*a* of the MS. described under D. No. 4338.

Complete.

This work contains 9 Prayogas.

Similar to the work described under D. No. 6664.

Beginning :

ब्रह्मलोके सुखासीनं सर्वलोकगुरुं शिवम् ।
सर्वलोकमयं साक्षात् सर्वतेजोमयं परम् ॥
सर्वविद्यामयं शश्वद् ज्ञानोपायं नवं परम् ।
प्रणम्य सर्वदेवाश्च ऋषयः प्रष्टुमागताः ॥
वसिष्ठो वामदेवश्च जाबालिः कपिलस्तथा ।
नारदश्च शुकः कण्वो विश्वामित्रश्च काश्यपः ॥
अगस्त्यश्च पुलस्त्यश्च दूर्वासारण्यकादयः ।
एवमादिमुनीन्द्राणां वृन्दमध्ये पितामहः ॥
पप्रच्छायं मुनिश्रेष्ठो शौनकः सुमहातपाः ।
आथर्वणस्य माहात्म्यं यथावद्वक्तुमर्हसि ॥

Colophon :

इति प्रथमः प्रयोगः समाप्तः ।

End :

पुरं हिरण्मयीं ब्रह्मा विवेशापराजिताम् ।

Colophon :

इत्याथर्वणापिप्पलादशाखीयं सपरिभाष्टं (!) प्रत्यङ्गिरासूक्तं समाप्तम् ।

The scribe adds :—

ओं तच्छंयोः * * चतुष्पदे । ओं शान्तिः । शान्तिः सर्वत्र जपहोमान्ते प्रत्यङ्गिरास्तोत्रपाठं च करिष्ये ।

D. No. 17452

Pages, 2. Lines, 12 on a page. Telugu. Injured. Extent, 42 granthas.

दूष्यादूषिरशीतिद्वात्रिंशदृचः ।

DŪṢYĀDŪṢIRAŚĪTIDVĀTRIMŚADṚCAḤ.

Begins on fol. 2*a* of the MS. described under D. No. 4338.

Complete.

Beginning :

शौनकशारवीयोक्त दूष्यादूषिरशीतिद्वात्रिंशदृचानां शक्र ऋषिः । गायत्र्युष्णिगनुष्टुप् बृहतीपङ्क्तित्रिष्टुब्जगत्यः सप्त छन्दांसि । शक्रदेव(वो) देवता । मन्त्रोक्तफलसिद्ध्यर्थे जपे विनियोगः । ओं दूष्यादूषिरसि वात्याहेतिरसि । हन्यामेनिरसि ।

End :

एवाहं सर्वंदुभूतं कत्रं कृत्याकृताकृतं हस्ति वरजो. . . रितं जहामि (32) ।

Colophon :

इति शौनकशारवीयं समाप्तम् ।

D. No. 17453

Pages, 9. Lines, 10 on a page. Telugu. Injured. Extent, 100 granthas.

प्रत्याङ्गिराकवचः ।

PRATYAṄGIRĀKAVACAḤ.

Begins on fol. 14*a* of the MS. described under D. No. 4338.

Complete.

Same work as that described under D. No. 6645 with different end given as below.

Colophon :

इत्याथर्वणे निकुंभिलायागविधाने प्रत्याङ्गिराकवचं नाम पञ्चमोऽध्यायः ।

End :

प्रकाशिता तव प्रीत्या न देयं यस्य कस्यचित् ।
दातव्यं हि सदा तस्मै भक्तिश्रद्धान्वितो हि यः ॥

Colophon :

इति प्रत्यङ्गिराप्रस्तारे प्रत्यङ्गिराकवचं संपूर्णम् ।

D. No. 17454

Pages, 11. Lines, 10 on a page. Telugu. Injured. Extent, 125 granthas.

प्रत्याङ्गिरामालामन्त्रः ।

PRATYAṄGIRĀMĀLĀMANTRAḤ.

Begins on fol. 19*b* of the MS. described under D. No. 4338.

Complete.

Similar to the work described under D. No. 6658.

Beginning :

अथ स्तोत्रमालामन्त्रः । ह्रीं ओं ह्रीं श्रीगणेशाय नमः । आं ह्रीं क्रीं ओं क्लीं ह्रीं ह्रूं प्रत्यङ्गिरे भगवति प्रत्यङ्गिरे, हुं दुर्गायै नमः । अस्य श्रीप्रत्यङ्गिरामालामन्त्रस्य । महादेव ऋषिः । अनुष्टुप् छन्दः । प्रत्यङ्गिरा प्रत्यगात्मा देवता । मम * * विनियोगः ।

End :

क ए इल ह्रीं स्तंभिनी मोहिनी चैव, हस कह लह्रीं, क्षोभिणी द्राविणी तथा । सकलह्रीं जृंभिणी भ्रामिणी रौद्री क ए इलह्रीं हसक हलह्रीं सकलह्रीं तथा संहारिणीति च ।

Colophon :

। इति प्रत्यङ्गिरास्तोत्रमालामन्त्रः समाप्तः ।

D. No. 17455

Pages, 4. Lines, 8 on a page. Grantha. Good. Extent, 25 granthas.

प्रत्यङ्गिरामालामन्त्रः ।

PRATYAṄGIRĀMĀLĀMANTRAḤ.

Begins on fol. 58*a* of the MS. described under D. No. 4338.

Complete.

Fol. 60 contains Pratyangirāmālāmantra which is in Telugu character.

Similar to the work described under D. No. 6659.

Beginning :

कृष्णवस्त्रसहिते सकलदेवसंसेविते सकलजनोपद्रवह्रारिके-
दुष्टग्रहगजघटासंहारकारिणि अनेककोटिसिंहवाहिनि अनेकसहस्र
पादे सहस्रभुजे सहस्रवदने महाबलपराक्रमपूजिते सहस्रांशुजालजात-
विभूषिते अत्युच्छ्रिते जृंभणाकर्षणाभिचारादिदोषान् निवारय निवारय ।

End :

भल्लातककर्सैर्भक्तैरर्ककाष्ठैर्हुनेद्यदि ।
शत्रवस्तत्क्षणादेव प्रयान्ति यमसादनम् ॥
त्रिकोणकुण्डं दक्षिणाभिमुखं ।
செம்மொண்டை பசந்திறலே ஹோமம் |
मूलमन्त्रं भक्ष इति ।
खगोक्तविधानेन मुखान्तं कारयेद्बुधः ।
दक्षिणे यन्त्रमावाह्य अग्नावावाह्य देवताम् ॥
प्रत्यङ्गिराय विद्महे सिंहवक्त्राय धीमहि ।
तन्नः करालः प्रचोदयात् ।

D. No. 17456

Pages, 4. Lines, 13 on a page. Telugu. Injured. Extent, 78 **granthas.**

भागवतम् ।

BHĀGAVATAM.

Begins on fol. 91*a* of the MS. described under D. .No. **4338.**

Incomplete.

Contains 1st and 2nd Adhyāyās of the Second Skandha.

Same work as that described under D. No. 2161.

D. No. 17457

Pages, 2. Lines, 10 on a page. Telugu. Injured. Extent, 25 granthas.

गृहदेवतासंप्रोक्षणविधिः ।

GṚHADEVATĀSAMPROKṢAṆAVIDHIḤ.

Begins on fol. 141*a* of the MS. described under D. No. **4338.**

Complete.

Same work as that described under D. No. 2907.

D. No. 17458

Pages, 2. Lines, 8 on a page. Telugu. Injured. Extent, 7 granthas.

पञ्चास्त्रमन्त्रः ।

PAÑCĀSTRAMANTRAḤ.

Begins on fol. 69*a* of the MS. described under D. No. 4338.

Complete.

Next to the fol. 69, comparatively a small leaf contains the beginning of Pañcāstra which is restored from fol. 69.

Similar to the work described under D. No. 6809.

Beginning :

ओं(त्) यादचो प्रण(नः) योयोधि हिमधीस्य वद्रेगोंम यंणेरवेतु-
वित्सत । स्वःभुवः भूरों हनहन हुं फट् प्रचोदयाण्णियोधियो धीमहि
देवस्य भर्गः धियो यो नः प्रचोदयाद् भर्गोदेवस्य धीमहि देवस्य भर्गः

* * * *

ब्रह्मास्त्रं ब्रह्मदण्डं च तथा ब्रह्मशिरः परः ।
वायव्यं च तथा पाशुपतं प्र(परि)कीर्तितम् (?) ॥

End :

ओं क्लीं क्लिं क्लां कामदेवाय द्रां द्रीं क्लीं ब्लूं सःफट् ।

ओं नमो नारायणाय हुं फट् ।

D. No. 17459

Pages, 4. Lines, 11, 13, 14, on a page. Telugu. Good. Extent, 47 granthas.

चरणव्यूहः ।

CARAṆAVYŪHAḤ.

Begins on fol. 67*a* of the MS. described under D. No. 4338.

Complete.

Same work as that described under D. No. 897.

D. No. 17460

Pages, 3. Lines, 14 on a page. Telugu. Injured. Extent, 50 granthas.

सौभाग्यलक्ष्म्युपनिषत् ।

SAUBHĀGYALAKṢMYUPANIṢAT.

Begins on fol. 89*a* of the MS. described under D. No. 4338.

Incomplete.

Wants end.

Same work as that described under D. No. 835.

D. No. 17461

Palm-leaf. 14 × 2 inches. Pages, 116. Lines, 8, 9, 10, 11 on a page. Grantha. Good. Extent, 1,740 granthas.

परिभाषेन्दुशेखरः by नागेशभट्टः ।

PARIBHĀṢENDUŚEKHARAḤ by Nāgeśabhaṭṭa.

Begins on fol. 1*a*. The other work herein is Siddhāntakaumudī-vyākhyā—Tattvabodhinī 60*a*.

Complete.

Fol. 59 left blank.

Same work as that described under D. No. 1463.

The scribe adds— :

सुब्रह्मण्येन विदुषा परिभाषेन्दुशेखरः ;
लिखितः परितुष्टःसन् देयाच्छं शङ्करो मम ॥

D. No. 17462

Pages, 176. Lines, 12 on a page. Grantha. Good. Extent, 3,508 granthas.

सिद्धान्तकौमुदीव्याख्या—तत्त्वबोधिनी by ज्ञानेन्द्रसरस्वती ।

SIDDHĀNTAKAUMUDĪVYĀKHYĀ — TATTVABODHINĪ by Jñanendrasarasvati.

Begins on fol. 60*a* of the MS. described under previous number.

Incomplete.

Contains from Strīpratyaya to the end of Bahuvrīhisamāsa.

Same work as that described under D. No. 1429.

D. No. 17463

Pages, 22. Lines, 7 on a page. Grantha. Injured. Extent, 231 granthas.

मेरुतन्त्रम् ।

MERUTANTRAM.

Begins on fol. 18*a* of the MS. described under D. No. 13200.

Incomplete.

Contains 5, 7, 10, 11, Upadeśas.

Beginning :

अथ दुष्टशत्रूणामुच्चाटनमाह ।

अथातः संप्रवक्ष्यामि शत्रूणां दुष्टचेतसाम् ।
उच्चाटघातविस्फोटव्याध्युन्मत्तादिकारणम् ॥
[प]ुष्टस्यार्थनाशश्च प्रवक्ष्यामि समासतः ।
वेदशास्त्रागमोद्देश्यब्रह्मविष्णुमहेश्वरैः ॥

कथितं सर्वदा सिद्धैर्दुष्टदण्डो विधीयताम् ।
येनाहृतं गृहं क्षेत्रं कलत्रं धेनुधान्यकम् ॥
मानवाखण्डितं येन तस्य दण्डो विधीयते ।
ओड्डीशं यो न जानाति स रुष्टं किं करिष्यति ॥
तस्मात् सर्वप्रयत्नेन दुष्टदण्डो विधीयताम् ।
येन हन्तीति कूटेन सोऽतिशोकेन सिद्ध्यति ॥
पञ्चाङ्गुलं विकत्रस्य कीलं ग्राह्यं पुनर्वसौ (?) ।
सप्ताभिमन्त्रितं गेहे निखन्योच्चाटनं भवेत् ॥

ओं लोहितमुखे स्वाहा

* * * * * *

हन हन, दह दह, पच पच, शीघ्रमुच्चाटय उच्चाटय हु फट् स्वाहा ।

नरास्थिकीलकं द्वारे निखन्याच्चतुरङ्गुलम् ।
मन्त्रयुक्तमरिद्वारे सत्यमुच्चाटनं भवेत् ॥

नमो भगवते रुद्राय अमुकं गृह्ण अमुकं गृह्ण पच पच त्रासय त्रासय त्रोटय त्रोटय नाशय नाशय पशुपतिराज्ञापयति ठ ठ । उक्तयोगस्य मन्त्रः ।

* * * *

ओं श्री भैरवानन्दाज्ञा, श्री वीरभद्राज्ञा, एवं जंबादिमन्त्राणां सर्वमन्त्रप्रयोगाणामष्टोत्तरशताभिमन्त्रेण प्रयोक्तव्याः ।

Colophon :

इति श्रीमेरुतन्त्रे मोहनखण्डं नाम पञ्चमोपदेशः ।

End :

तिलतैलमजाक्षीरं कूष्माण्डं सक्तुकं समम् ।
तेन लिप्ते स्तनौ भूयः प्रत्यागच्छति कौतुकम् ॥
मयूरोत्थेन पित्तेन लिप्तहस्तेन मर्दयेत् ।
निर्गुण्डीपत्रकं भूमौ क्षिप्तं भवति वस्त्रकम् ॥
तद्वत्तु शिखिपित्तेन निम्बपत्राणि वृश्चिकाः ।
इत्येवं सर्वयोगानां मन्त्रराजं शिवोदितम् ।
पूर्वसेवायुतं जप्त्वा ततः सिद्ध्यति कौतुकम् ॥

ओं नमो भगवते रुद्राय ओड्डामरेश्वराय बहुरूपाय नानारूपधारिणे हसहस नृत्यनृत्य नानाकौतुकेन्द्रजालदर्शनाय हुं फट् ठठ स्वाहा । अनेन मन्त्रेण सर्वयोगा अभिमन्त्रिताः सिद्धा भवन्ति ।

Colophon and End :

इति श्रीमेरुतन्त्रे मन्त्रखण्डे कौतूहलेन्द्रजाले नाम एकादशोपदेशः ।

अथ यक्षिणीसाधनम् ।
सर्वासां यक्षिणीनां तु ध्यानं कुर्यात्समाहित· ।

D. No. 17464

Palm-leaf. $18\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 150. Lines, 7 on a page. Grantha. Injured. Extent, 2,034 granthas.

रामायणव्याख्या—श्रृङ्गारतिलकम् by गोविन्दराज ।
RĀMĀYAṆAVYĀKHYĀ—ŚṚṄGĀRATILAKAM by Govindarāja.

Incomplete.

Contains 1 to 37 Sargās in Sundarakāṇḍa.

Same work as that described under D. No. 5009.

D. No. 17465

Pages, 16. Lines, 8 on a page. Telugu. Good. Extent, 259 granthas.

ज्ञानसारः ।

JÑĀNASĀRAḤ.

Begins on fol. 32*a* of the MS. described under D. No. 4544.

Incomplete.

Contains 1 to 3 Paṭalas.

Similar to the work described under R. No. 3109 (*h*).

Beginning :

वाणीं लोकेशवनितां वराभयकराम्बुजाम् ।
वन्दे राकेन्दुवदनां वाग्विलासविधायिनीम् ॥

सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम् ।
सुब्रह्मण्य सदानन्दं सद्गुरुं प्रणतोऽस्म्यहम् ॥

ओं नमः परमानन्दाखण्डायामिततेजसे ।
सुब्रह्मण्याय विदुषे प्रसन्नाय नमो नमः ॥

यस्याचिन्त्यं परमतिविमलं रूपमव्यक्तमेवे-
त्याम्नायोक्तं तदपि तमहो गम्यमेवाप्यवाच्यम् ।
तत्पादाब्जं सततमपि हृदि? ध्यायिनां वासुलभ्यं
सुब्रह्मण्यं मम गुरुममितानन्दकन्दं भजामि ।

* * *

वेदवेदान्तसिद्धान्तसारं संयमिनां प्रियम् ।
ज्ञानसारमिति प्रोक्तं संवादं कुरुशिष्ययोः ॥
कश्चिन्मुमुक्षुर्मेधावी ब्राह्मणो वेदविच्छुचिः ।
स्वगुरुं वीक्ष्य शुद्धात्मा वचनं चेदमब्रवीत् ।

End :

श्रुत्वा गुरोर्वचनतः परमात्मतत्त्व-
मानन्दमाद्यमणुरूपमवेक्ष्य तस्मिन् ।

वायोरतीव चलनादमले स्वचेतः
स्थातुं न शक्यमिति चाह वदेत्युपायम् ॥

Colophon :

इति ज्ञानसारे तारकवर्णनं नाम तृतीयः पटलः ।

—

D. No. **17466**

Pages, 2. Lines, 8 on a page. Nandinagari. Injured. Extent, 12 granthas.

अष्टाक्षरीमन्त्रः ।

ASṬĀKṢARĪMANTRAḤ.

Begins on fol. *5a* of the MS. described under D. No. 5786.

Complete.

Similar to the work described under D. No. 5917.

Beginning :

अथ अष्टाक्षरमन्त्रः – ओं नमो नारायणाय ओं इति प्राणायामः । ओं ओं विश्वाय नमः । ओं नं भं तैजसाय नमः । नेत्रयोः । ओं ओं प्राज्ञाय नमः । वाचि । ओं नां तुर्याय नमः । हृदि । ओं रां आत्मने नमः ।

End :

श्रीलक्ष्मीनारायणप्रेरणया श्रीलक्ष्मीनारायणप्रीत्यर्थं यथाशक्ति नियमेन नारायणाष्टाक्षरमन्त्रजपं कारिष्ये । ओं ओं नमो नाराय-णाय ओं इति जपः । पुनः प्राणायामादि । उपसंहारः पूर्ववत् ।

D. No. **17467**

Page, 1. Lines, 8 on a page. Nandinagari. Injured. Extent, 6 granthas.

कृष्णैकाक्षरमन्त्रः ।

KṚṢṆAIKĀKṢARAMANTRAḤ.

Begins on fol. 26*b* of the MS. described under D. No. 5786.

Complete.

Similar to the work described under D. No. 6017.

Beginning ;

अस्य श्री एकाक्षरकृष्णमन्त्रस्य ब्रह्मा ऋषिः । देवी गायत्री छन्दः । श्रीकृष्णो देवता । श्रीकृष्णप्रेरणया श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ।

End :

श्रीकृष्णप्रेरणया श्रीकृष्णप्रीत्यर्थं एकाक्षरकृष्णमालामन्त्रजपं करिष्ये । ओं क्लीं ओं इति जपः । उपसंहारः पूर्ववत् ।

D. No. 17468

Pages, 19. Lines, 7 on a page. Nandinagari. Injured. Extent, 200 granthas.

विष्णुपूजाविधिः ।

VIṢṆUPŪJĀVIDHIḤ.

Begins on fol. 31*a* of the MS. described under D. No. 5786.

Incomplete.

Same work as that described under D. No. 8635, with a different name as Devatārcanavidhi.

D. No. 17469

Pages, 4. Lines, 7 on a page. Nandinagari. Injured. Extent, 52 granthas.

महाभिषेकखण्डः ।

MAHĀBHIṢEKAKHAṆḌAḤ.

Begins on fol. 41*a* of the MS. described under D. No. 5786.

Complete.

Contains Vedic matter, relating to the Mahābhiṣeka of God Indra.

Beginning ;

अथात इन्द्रं महाभिषेकस्य देवा अब्रुवन् । स प्रजापतिः अयं देवानामोजिष्ठो बलिष्ठस्साधिष्ठःसत्तमः पारयिष्णुतम इममेवाभिषिञ्चामह इति । तथेतितद्वै तदिन्द्रमेव तस्मा एतामासन्दीं समभरन् ।

End :

साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधि-
पत्यं जित्वा अस्मिन् लोके स्वयंभूरसर्वशक्तमृतोऽमुष्मिन स्वर्गे लोके
सर्वान् कामानाप्त्वामृतः समभवत् समभवत् ।

D. No. **17470**

Pages, 6. Lines, 8 on a page. Grantha. Much injured. Extent, 55 granthas.

नारायणवर्ममन्त्रः ।

NĀRĀYAṆAVARMAMANTRAḤ.

Begins on fol. 65*a* of the MS. described under D. No. 5245.

Without Ṛṣi and Chanda, etc., in the beginning.

Complete.

Same work as that described under D. No. 6480.

D. No. **17471**

Pages, 5. Lines, 5 on a page. Grantha. Much injured. Extent, 27 granthas.

तप्तमुद्राङ्कनप्रमाणानि ।

TAPTAMUDRĀṄKANAPRAMĀṆĀNI.

Begins on fol. 1*a* of the MS. described under D. No. 11974.

Incomplete.

Wants end.

Similar to the work described under D. No. 5255.

Beginning :

श्रुतिः —

प्रते विपणो अब्जचक्रे पवित्रे जन्मांभोधिं तर्तवे चर्षणीन्द्रः ।
मूले बाह्वोर्दधतेन्ये पुराणा लिङ्गान्यङ्गे तावकान्यर्पयन्ति । सामनि

पवित्रमित्याग्निः । अग्निर्वै सहस्रारः । सहस्रारो नेमिः । नेमिना तप्ततनुः अतप्ततनूर्न तदामो अश्नुते । ब्रह्मणः सायुज्यं सलोकता-माप्नोति ।

End :

तस्मात् सर्वेषु देवेषु स . . . . श्रीमते श्रीनि-वासपरब्रह्मणे नमः । श्रीमते हयग्रीवाय . . . .

D. No. 17472

Pages, 5. Lines, 6 on a page. Grantha. Slightly injured. Extent, 38 granthas.

गरुडोपनिषत् ।

GARUḌOPANIṢAT.

Begins on fol. 44*a* of the MS. described under D. No. 5236.

Complete.

Same work as that described under D. No. 428, but with the addition of the following stanzas at the end.

End :

अमृतकलशहस्तं कान्तिसंपूर्णगात्रं
सकलविबुधवन्द्यं वेदशास्त्रैरचिन्त्यम् ।

विपुलपृथुलपक्षैर्दूयमानाण्डगोलं
सकलविषविनाशं चिन्तयेत् पक्षिराजम् ।

सुपर्णं वैनतेयञ्च नागारिं नगभूषणम् ।

जितान्तकं जितामित्रमादित्यं विश्वतो मुखम् ।

गरुत्मन्तं खगपतिं ताक्ष्यं काश्यपनन्दनम् ।

द्वादशैतानि नामानि गरुडस्य महात्मनः ।

प्रभाते संस्मरेन्नित्यं स्नातो वा यदि मानवः ।
विषं नाशयते शीघ्रं नहिंस्रो न च पन्नगः ॥

D. No. 17473

Pages, 2. Lines, 7 on a page. Grantha. Injured. Extent, 18 granthas.

पञ्चगव्यसम्मेलनविधिः ।

PAÑCAGAVYASAMMELANAVIDHIḤ.

Begins on fol. 51*a* of the MS. described under D. No. 5236.

Complete.

Same work as that described under D. No. 3478.

D. No. 17474

Pages, 16. Lines, 6 on a page. Grantha. Much injured. Extent, 140 granthas.

गृह्यरत्नम् ।

GṚHYARATNAM.

Begins on fol. 58*a* of the MS. described under D. No. 5236.

Incomplete.

Contains Khaṇḍas 1 and 2 incomplete.

Fol. 58 contains the prayogas of the above work.

Same work as that described under D. No. 1198.

D. No. 17475

Pages, 13. Lines, 6 on a page. Grantha. Much injured. Extent, 110 granthas.

लक्ष्मीहृदयम् ।

LAKṢMĪHṚDAYAM.

Begins on fol. 5*b* of the MS. described under D. No. 7103.

Complete.

In praise of Goddess Śri Mahālakṣmi.

Contains some spells also.

Beginning :

श्रीमत्सौभाग्यजननीं नौमि लक्ष्मीं सनातनीम् ।
सर्वकामफलावाप्तिसाधनैकशुभावहाम् ॥

स्मरामि नित्यं देवेशि त्वया प्रेरितमानसः ।

त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम् ।

समस्तसंपत्सुखदां महाश्रियं

समस्तसौभाग्यकरीं महाश्रियम् ।

समस्तकल्याणकरीं महाश्रियं

भजाम्यहं ज्ञानकरीं महाश्रियम् ॥

* * * *

आद्यादिलक्ष्मीहृदयं पठेद्यः

सराज्यलक्ष्मीमचलां तनोति ।

महादरिद्रोऽपि भवेद्धनाढ्य-

स्तदन्वये श्रीः स्थिरतां प्रयाति ॥

यस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा ।

तस्याभीष्टं ददात्याशु तं पालयति पुत्रवत् ।

इदं श्रीहृदयं पुण्यं सर्वकामसमृद्धिदम् ।

जपेत् पञ्चसहस्रं तु पुरश्चरणमुच्यते ॥

End :

ओं ऐं ह्रीं श्रीं क्लीं कमलधारिणि, महालक्ष्मि, नारायणाय, सिद्धिवाहिनि वषट् स्वाहा ।

Colophon :

इत्याथर्वणरहस्ये उत्तरखण्डे लक्ष्मीहृदयं नाम त्रिंशत्पटलः ।

D. No. 17476

Pages, 20. Lines, 6 on a page. Grantha. Injured. Extent, 120 granthas.

अवधूतगीता ।

AVADHŪTAGĪTA.

Begins on fol. 12*a* of the MS. described under D. No. 7103.

Incomplete.

Same work as that described under D. No. 4543.

D. No. 17477

Pages, 45. Lines, 6 on a page. Grantha. Much injured. Extent, 270 granthas.

अपामार्जनकल्पः ।

APĀMĀRJANAKALPAḤ.

Begins on fol. 1*a* of the MS. described under D. No. 7097.

Complete.

Same work as that described under D. No. 7740 with different end.

End :

य इदं पठते नित्यं श्रावयेद्वा समाहितः ।
भजते तं सदा लक्ष्मीरलक्ष्मीस्तं न गच्छति ॥
धन्यो यशस्वी धृतिमान् स्तवोऽयं मुनिसत्तम ।
पठतां शृण्वतां चैव ददाति परमां गतिम् ।

Colophon :

इति श्रीविष्णुधर्मोत्तरपुराणे दाल्भ्यपुलस्त्यसंवादे अपामार्जनस्तोत्रं संपूर्णम् ।

D. No. 17478

Pages, 7. Lines, 5 on a page. Grantha. Much injured. Extent, 35 granthas.

सुदर्शनयन्त्रोद्धारः ।

SUDARŚANAYANTRODDHĀRAḤ.

Begins on fol. 28*a* of the MS. described under D. No. 7097.

Complete.

Same work as that described under D. No. 8145.

Beginning :

आदौ षट्कोणं लिखित्वा तन्मध्ये साध्यनाम लिखित्वा अथ ॐ ह्रीं श्रीं क्ष्रीं क्लीं ऐं ईं क्षुं क्ष्रैं हुं रां कूं इति द्वादशबीजाक्षरं लिखित्वा षट्कोणेषु सारारं हुं फट् इति सुदर्शनषडक्षराणि लिखेत् । तदुपरि ह्रीं इति मायाबीजेन वेष्टयेत् ।

End :

काशीक्षेत्रनिबर्हणाय बाणासुरसहस्रभुजवनदावाग्नये कल्पान्तदहनाय श्रीमहाविष्णवे क्ष्रैं हन हन हुं हुं फट् फट् स्वाहा श्रीसुदर्शनाय नमः ।

D. No. 17479

Pages, 6. Lines, 6 on a page. Grantha. Much injured. Extent, 36 granthas.

भागवतश्लोकाः ।

BHĀGAVATAŚLOKĀḤ.

Begins on fol. 32*a* of the MS. described under D. No. 7097.

Incomplete.

Contains some selected stanzas of 1st Skandha in praise of Lord Kṛṣṇa.

Same work as that described under D. No 2161.

D. No. 17480

Pages, 4. Lines, 6 on a page. Grantha. Much injured. Extent, 24 granthas.

नालवेष्टनशान्तिः ।

NĀLAVEṢṬANAŚĀNTIḤ.

Begins on fol. 38*a* of the MS. described under D. No. 7097.

Incomplete.

Same work as that described under D. No. 3663.

D. No. 17481

Pages, 4. Lines, 7 on a page. Grantha. Much injured. Extent, 22 granthas.

आशौचविषयः ।

ĀŚAUCAVIṢAYAḤ.

Begins on fol. 40*a* of the MS. described under D. No. 7097.

Incomplete.

Same work as that described under D. No. 3032.

D. No. 17482

Pages, 3. Lines, 10 on a page. Grantha. Injured. Extent, 12 granthas.

नामद्वादशपञ्जरम् ।

NĀMADVĀDAŚAPAÑJARAM.

Begins on fol. 13*b* of the MS. described under D. No. 9021.

Complete.

Same work as that described under D. No. 6473.

Fol. 44*b* contains Rāmastuti.

D. No. 17483

Palm leaf. 16¾ × 1¼ inches. Pages, 20. Lines, 8 on a page. Telugu. Good. New. Extent, 340 granthas.

न्यायपरिशुद्धिः by वेदान्तदेशिकः ।

NYĀYAPARIŚUDDHIḤ by Vedāntadeśika.

Breaks off in second Āhnika of the pratyakṣa.

Same work as that described under D. No. 4911.

D. No. 17484

Pages, 74. Lines, 6 on a page. Grantha. Much injured. Extent, 555 granthas.

बृहज्जातकम् by वराहमिहिरः ।

BṚHAJJĀTAKAM by Varāhamihira.

Begins on fol. 262*a* of the MS. described under D. No. 13421.

Incomplete.

Contains 1 to 23 Adhyāyas.

Same work as that described under D. No. 13832.

D. No. 17485

Pages, 30. Lines, 5 on a page. Telugu. Injured. Extent, 375 granthas.

काळहस्तिमाहात्म्यम् ।

KĀLAHASTIMĀHĀTMYAM.

Begins on fol. 114*a* of the MS. described under D. No. 9896.

Incomplete.

Contains Adhyāyas 50 to 77, complete, 78 incomplete.

Same work as that described under D. No. 2385.

D. No. 17486

Pages, 42. Lines, 6 on a page. Telugu. Much injured. Extent, 550 granthas.

सपिण्डाविवाहनिषेधविचारः ।

SAPIṆḌĀVIVĀHANIṢEDHAVICĀRAḤ.

Begins on fol. 1*a* of the MS. described under D. No. 5761.

Complete.

Similar to the work described under D. No. 2983.

Beginning :

यज्ज्ञात्वा मुक्तिमाप्नोति यज्ज्ञानं शास्त्रमूलकम्
ये वैदिकाचारविचारदक्षा
ये शास्त्रमूलाकलनाप्रवीणाः ।
येषां प्रमाणं शरणं बुधेभ्य-
स्तेभ्यः प्रमाणाञ्जलिरध बद्धः ॥

"असपिण्डा च या मातुरसपिण्डा यवीयसीम्" । इत्यादिना मनुविधिभिः सपिण्डाविवाहो निषिध्यते । तत्रेदं विचार्यते । कश्चिद्देवमित्रो वैश्वामित्रः कूटस्थः । तस्य पुत्र्यौ लक्ष्मीपार्वत्यौ । तयोः पार्वत्याः सर्वज्ञाख्यः काश्यपः । तस्य पुत्री पूर्णवती । तस्याः पुत्रः साधुवृत्तो भरद्वाजः । अयमेकः पक्षः ।

End :

ननु कूटस्थगणनायामित्यादि किमर्थं कल्पितमिति चेत्—कैश्चिदान्ध्रैः स्वाचारस्य शास्त्रीयत्वप्रदर्शनेन द्रविडादिप्रतारणार्थममात्रादिष्वपि देशभाषानुसारेण मात्रादिपदानि प्रयुज्य ञ्चाग्रस्य पदविन्यासादिभिर्वा मत्कुणापगेत्यादिवत् कल्पितेति प्रतिभाति :—

मूर्खाः स्वैरं प्रवर्तन्तां शास्त्रोन्मूलं कुयुक्तिभिः ।
शास्त्रमेवानुधावामः प्रमाणशरणा वयम् ॥

D. No. 17487

Pages, 6. Lines, 5 on a page. Telugu. Injured. Extent, 47 granthas.

श्राद्धनियमवचनानि ।
ŚRĀDDHANIYAMAVACANĀNI.

Begins on fol. 22*a* of the MS. described under D. No. 5761.

Complete.

Similar to the work described under D. No. 3084.

Beginning :

नष्टाग्निर्दूरभार्यश्चेत् पार्वणे समुपस्थिते ।
अयाश्चेत्यग्निसन्धानं कर्मान्ते वह्निमुत्सृजेत् ।
पत्न्यां दूरे संस्थितायां प्रमादात्
दाराधीनत्वाच्च गार्हस्थ्यवह्नः ।
. . . प्राप्तेनाहिताग्निः प्रवासे
कुर्यात् सर्वं होमवर्जं यथोक्तम् ॥
श्राद्धात् पूर्वं तर्पणं वैश्वदेवं
यज्ञान् पश्चाप्यर्चनं देवतानाम् ।
पार्थक्येन . . . क कृत्वाखिलेषु
श्राद्धेष्वेवं याजुषः श्राद्धकृत स्यात ॥

End :

उद्धृत्य वह्निं प्रणवेन चादा-
वन्वग्निरित्याहरयत् पुरस्तात् ।
निधाय पृष्टो दिवि मन्त्रकेण
ततस्तु होमः शकलैश्चतुर्भिः ॥
तत्सवितुस्तान् सवितुरद्यानो
विश्वानि नो दुर्ग इमेति मन्त्राः ।
नारोपणं चाप्यवरोपणं च
उत्पत्तिरेवं विधुरानलस्य ॥
नित्यानि नैमित्तिककाम्यकर्म
तत्रैव कुर्याद्विधुरः सदैव ॥

D. No. 17488

Pages, 35. Lines, 6 on a page. Telugu. Much injured. Extent, 368 granthas.

वेदलक्षणम् ।

VEDALAKṢAṆAM.

Begins on fol. 26*a* of the MS. described under D. No. 5761.

Complete.

Similar to the work described under D. No. 14080.

Beginning :

तस्यां प्रमाणं प्रथमे प्रातिशाख्यप्रपाठके ।
रेफादेशेऽपि शब्दाच्च नयामत्यार्षशब्दतः ॥
त्रिक्रमेप्यष्टधा सन्धिर्द्वौ द्वावाद्यन्तयोरपि ।
आर्षसंज्ञास्त एवात्र सन्धयोऽन्ये त्वनार्षकाः ॥
आकारान्तमुदात्तान्तमाङ्परं यत्र दृश्यते ।
त्रिक्रमं तं विजानीयान्मोषूण ऊषुणस्तथा ।
अन्यत्र पञ्चधा सन्धिस्तत्राद्यन्तौ तथार्षकौ ।

End :

अत्रापि नानाविधसद्भावेऽपि कृते आरोपसवर्णदीर्घयोः प्रसक्तौ पूर्वसूत्रप्राबल्येन सवर्णदीर्घे कृते आकारश्रुतौ प्राप्तायामश्वाजनिप्रचेतस इत्यत्र विलोमकाले प्रचेतसाश्वाजनिति लोप एव ।

पदान्तौ च नञौ यत्र यवहेषु परेषु च ।
द्वित्वं नैवाधिगच्छेतां य . . . परौ विना ॥

D. No. 17489

Pages, 86. Lines, 8 on a page. Grantha. Injured. Extent, 1,272, granthas.

कर्मप्रकाशिका by पञ्चाक्षरगुरुनाथ ।

KARMAPRAKĀŚIKĀ by Pañcākṣaragurunātha.

Begins on fol. 1*a* of the MS. described under D. No. 7233.

Incomplete.

Contains Nityakarmapariccheda only, complete.

Same work as that described under R. No. 3366 wherein. See for the end.

Beginning :

वन्दे विनायकं देवं वामदेवं शिवं गुहम् ।
वाणीमपि महाविष्णुं वाञ्छितार्थप्रदायिनम् ॥
नित्यं नैमित्तिकं कर्म नानामार्गविभेदतः ।
व्यामोहकमशेषाणां द्विजानां विदुषामपि ॥
तेन बोधायनादीनां मार्गं ज्ञात्वा समासतः ।
कर्मप्रकाशिकां नित्यनैमित्तिकावबोधिनीम् ।
बालानामपि बोधाय वक्ष्ये पञ्चाक्षरो गुरुः ॥

D. No. 17490

Page, 1. Lines, 5 on a page. Grantha. Slightly injured. Extent, 8 granthas.

वटुनियमवचनानि ।

VAṬUNIYAMAVACANĀNI.

Begins on fol. 44*a* of the MS. described under D. No. 7233.

Incomplete.

A collection of rules relating to Brahmacārins.

Beginning :

संकल्पमात्राः सह भोजनं च
वटोर्विदध्यात् पवनादिकार्यम् ।
संस्कृत्य सर्पिः पटकृष्णचर्म
यज्ञोपवीत्याचमनीयहोमः ॥

End :

जातवेदसमन्त्रश्च गृहमन्त्रांस्तथैव च ।
शन्न इन्द्राग्निसूक्तश्च यत इन्द्र त्रिवन च ॥
मुञ्चामित्वेति सूक्तश्च अष्टोत्तरशतं जपेत् ।

D. No. 17491

Pages, 34. Lines, 13 on a page. Grantha. Much injured. Extent, 691 granthas.

नानार्थरत्नमाला by इरुगपदण्डाधिनाथ ।

NĀNĀRTHARATNAMĀLĀ by Irugapadaṇḍādhināthā.

Begins on fol. 90*a* of the MS. described under D. No. 11622.

Incomplete.

Contains Eākṣarakāṇḍa complete, Dvyakṣarakāṇḍa incomplete.

Same work as that described under D. No. 1719.

D. No. 17492

Pages, 9. Lines, 5 on a page. Grantha. Injured. Extent, 65 granthas.

आपस्तम्बापरप्रयोगः ।

ĀPASTAMBĀPARAPRAYOGAḤ.

Begins on fol. 1*a* of the MS. described under D. No. 13755.

Incomplete.

Similar to the work described under D. No. 3526.

Beginning :

यदि मरणसंशये ब्रह्मविदाप्नोति परं, भृगुर्वै वारुणिरित्येतावनुवाकौ ब्रह्मविदो दक्षिणे कर्णे जपति । इतरेषामायुषः प्राणं सन्तन्विति । इति प्रेति प्रेते मात्थाः प्राचीनावीतिनः केशान् प्रकिरयापांसुना वपन्ते दक्षिणाशिरसं दर्भेषु संवेशयन्ति ।

End :

यथा त्वमुद्भिनत्स्योषधीरिति प्रत्येत्य गृहानुत्तरपूर्वे देशे भारस्याग्निमुपसमाधाय संपरिस्तीर्यानुलोमकृततया वारुण्या स्रु . . द्वे चतुर्गृहीते जुहोति ।

D. No. 17493

Pages, 4. Lines, 5 on a page. Slightly injured. Extent, 27 granthas.

पुत्रस्वीकारविधिः ।

PUTRASVĪKĀRAVIDHIḤ.

Begins on fol. 6*a* of the MS. described under D. No. 13755.

Complete.

Similar to the work described under D. No. 3184.

Beginning :

अथ पुत्रसंग्रहविधिं व्याख्यास्यामः—पुण्येषु तिथिवारेषु दम्पती मङ्गलस्नातौ भूत्वा वैदिकान् ब्राह्मणान् निमन्त्र्य पुण्याहं वाचयित्वा कर्ता कृतप्राणायामः संकल्प्य मम धर्मपत्न्या सह सन्तानार्थं पुत्रपरिग्रहं संकल्प्य भूर्भुवस्वरोमित्यग्निं प्रतिष्ठाप्य औपासनं कृत्वा तस्मिन् चरुं श्रपयित्वा अभिघार्य प्राचीनमुदीचीनं वोद्वास्य प्रतिष्ठितमभिघार्य ।

End :

अनन्तरं प्रायश्चित्ताहुतीर्जुहुयात् । ब्रह्मविसर्जनं सिद्धमाधेनुवरप्रदानात् आचार्याय वरं दधाति । ब्राह्मणेभ्यो हिरण्यं दत्वा अभ्युदयं कृत्वा स्वीकृतपुत्रधारितकुण्डलादीन् आचार्याय दद्यात् ।

Colophon :

। इति बोधायनोक्तपुत्रस्वीकारविधिः समाप्तः ।

ind :

अथ लौकिकधर्मेण हरिद्राकल्पेन पुत्रस्य पादौ प्रक्षाल्य उभौ जाया-
ती प्राश्नीयात् ।

D. No. **17494**

Pages, 15. Lines, 7 on a page. Grantha. Good. Extent, 177 granthas.

भारद्वाजपितृमेधसूत्रम् by भारद्वाज ।
BHĀRADVĀJAPITṚMEDHASŪTRAM by Bhāradvāja.

Begins on fol. 8*a* of the MS. described under D. No. 13755.

Incomplete.

Breaks off in Ānandahoma.

Same work as that described under D. No. 1234.

D. No. **17495**

Pages, 38. Lines, 6 on a page. Grantha. Good. Extent, 333 granthas.

आपस्तम्बगृह्यसूत्रम् by आपस्तम्ब ।
ĀPASTAMBAGṚHYASŪTRAM by Āpastamba.

Begins on fol. 16*a* of the MS. described under D. No. 13755.

Complete.

Foll. 34, 35, contain an incomplete portion of gṛhyasūtram.

Same work as that described under D. No. 1180.

D. No. **17496**

Pages, 16. Lines 5 on a page. Grantha. Slightly injured. Extent 100 granthas.

श्राद्धप्रयोगः ।
ŚRĀDDHAPRAYOGAḤ.

Begins on fol. 45*a* of the MS. described under D. No. 13755.

Incomplete.

Same work as that described under D. No. 3823.

10

D. No. 17497

Pages, 4. Lines, 8 on a page. Telugu. Much injured. Extent, 28 granthas.

गायत्रीहृदयम् ।

GĀYATRĪHṚDAYAM.

Begins on fol. 40*a* of the MS. described under D. No. 13546.
Incomplete.
Similar to the work described under D. No. 6222.

Beginning :

अस्य श्रीगायत्रीहृदयस्तोत्रमन्त्रस्य । प्रह्लाद ऋषिः । गायत्री छन्दः । अग्निर्देवता । आं बीजं । ईं शक्तिः । ऊं कीलकम् । श्रीगायत्रीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

इत्येषा गायत्री । किं गोत्रा कत्यक्षरा । कतिपादा कतिकुक्षिः कतिशीर्षा । सांख्यायनसगोत्रा । चतुर्विंशत्यक्षरा गायत्री । त्रिपादा गायत्री । षट् कुक्षिः । पञ्चशीर्षा । केऽस्याः त्रयः पादाः भवन्ति । का अस्याः कुक्षयः । कानि शीर्षाणि । ऋग्वेदोऽस्याः प्रथम पादो भवति । यजुर्वेदोऽस्या द्वितीयःपादः । सामवेदो(स्या) तृतीयः । पूर्वादिः प्रथमा कुक्षिर्भवति ।

D. No. 17498

Pags, 8. Lines, 6 on a page. Grantha. Injured. Extent, 60 granthas.

श्रुतबोधः ।

ŚRUTABODHAḤ.

Begins on fol. 117*a* of the MS. described under D. No. 9731.
Complete.
Same work as that described under D. No. 1800.

D. No. 17499

Pages, 8. Lines 8 on a page. Grantha. Injured. Extent, 10? granthas.

आह्निकम् ।

ĀHNIKAM.

Begins on fol. 121*a* of the MS. described under D. No. 9731.
Complete.
Similar to the work described under D. No. 2822.

Beginning :

ब्राह्मे संकीर्तयन् श्रीहरिरिति सुमतिः समशोग्राह इत्य
युच्चार्याचान्त उच्चैरखिलमुखमहागद्यतः संविचिन्त्य ।
त्यक्त्वा योगं समाप्याभिगमन मथ तु त्रस्तनिर्विण्णचित्त
स्सद्धैर्यं प्राप्य संकल्पयुगमभिगमेप्रार्थ्यविघ्नस्यशान्ति ॥

End :

तं ध्यायन् संशयीतान्तरथ विरहिते निद्रया ध्यानयुक् स्याद्
इत्येवं वर्तमाने विरविलमपि भवेत् कर्म कैङ्कुर्यमस्य ।
कालो वन्ध्योऽखिलः स्यादिति विहितसदाचार युक्तस्स देवः
सर्वाशीःकारणं स्यान्निखिलभरधरो निस्तुलानन्ददायी ॥

D. No. 17500

Pages, 18. Lines, 5 on a page. Telugu. Injured. Extent, 162 granthas.

कृष्णाष्टमीव्रतकल्पः ।

KṚṢṆĀṢṬAMĪVRATAKALPAḤ.

Begins on fol. 57*a* of the MS. described under D. No. 4374.

Complete.

Similar to the work described under D. No. 8266.

Beginning :

वामस्तनं पिबन्तं च स्पृशन्तं पाणिनापरम् ।
विलोकयन्तं प्रम्ना तु मुखं मातुर्मुहुर्मुहुः ॥

End :

वित्तानुसारविभवैर्भक्त्या यश्च प्रपूजयेत् ।
पा(प)कोटिवि निर्मुक्तो यास्यते परमां गतिम् ॥

Colophon :

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे कृष्णाष्टमीव्रतकल्पं संपूर्णम् ।

D. No. 17501

s, 14. Lines, 7 on a page. Telugu. Much injured. Extent. 196 granthas.

श्रीसूक्तभाष्यम् by माधवाचार्य ।

ŚRĪSŪKTABHĀṢYAM by Madhavācārya.

Begins on fol. 54*a* of the MS. described under D. No. 9068.

Complete.

Same work as that described under D. No. 23.

D. No. 17502

Page, 1. Lines, 9 on a page. Grantha. Injured. Extent, 8 granthas.

हयग्रीवपूजा ।

HAYAGRĪVAPŪJĀ.

Begins on fol. 2*b* of the MS. described under D. No. 7698.

Complete.

On the worship of God Śri Hayāgriva Viṣṇu.

Beginning :

अथपूजा—वैष्णवपीठे समावाह्य समर्चयेत् । वागीश्वराय विद्महे हयग्रीवाय धीमहि । तन्नो हंसी प्रचोदयात् । इति गायत्र्यावाह्य समर्चयेत् ।

End :

कूमुदाय कुमुदाक्षाय पुण्डरीकाय वामनाय शङ्कुकर्णाय सर्वनेत्राय सुमुखाय सुप्रतिष्ठिताय पिङ्गलाय हरिसेनाय इति । ततो लोकपालान् पूजयेत् । ततः पद्माय । पुस्तकाय । वरदाय । इति पूजयेत् ।

D. No. 17503

Pages, 2. Lines, 10 on a page. Grantha. Injured. Extent, 14 granthas.

हयग्रीवपूजा ।

HAYAGNĪVAPŪJĀ.

Begins on fol. 3*a* of the MS. described under D. No. 7698.

Complete.

Same as the above.

Beginning :

अथ पूजा—केवलपद्मपीठं संभाव्य तत्कर्णिकामध्ये सोममण्डलं विचिन्त्य तन्मध्ये . . मण्डलं विचिन्त्य तन्मध्ये समावाह्य तत्र दिक्षु-सनन्दानन्दाय नमः श्रियै नमः पृथिव्यै नमः इति समर्चयेत् ।

End :

तद्बहिः समस्तप्रकटादिनवयोगिनीः सप्तनदीः नवग्रहांश्चाष्टपर्वतांश्च नक्षत्रसप्तविंशतिं च समर्चयेत् । त्रिपुराविजये अष्टमपटले समस्तप्रकटादि-योगिन्यः प्रोक्ताः ।

D. No. **17504**

Pages, 21. Lines, 6 on a page. Grantha. Much injured. Extent 200 granthas.

अष्टादशभेदनिर्णयः by रङ्गनाथः ।

ASTĀDAŚABHEDANIRṆAYAḤ dy Raṅganātha.

Begins on fol. 1*a* of the MS. described under D. No. 11423.

Complete.

This work is also called Vivādārthasaṅgrahaḥ.

Same work as that described under D. No. 5198.

D. No. **17505**

Pages 38. Lines, 8 on a page. Grantha. Much injured. Extent, 532 granthas.

गीतार्थसंग्रहरक्षा by वेदान्तदेशिक ।

GĪTĀRTHASAṄGRAHARAKṢĀ by Vedāntadeśika.

Begins on fol. 42*a* of the MS. described under D. No. 11423.

Complete.

Same work as that described under D. No. 4881.

D. No. **17506**

Palm leaf. 13½ × 1½ inches. Pages, 2. Lines, 6 on a page. Telugu. Good. Old. Extent, 17 granthas.

माण्डूक्योपनिषत् ।

MĀṆḌŪKYOPANIṢAT.

Begins on fol. 1*a*. The other works herein are :—

Kāśīkhaṇḍa 2*a*, Ādityahṛdayam 7*a*, Sūryadvādaśāryāstotra 16*b* and 17*b*, Sūryasaptāryāstotra 18*b*, Sūryāryānavakam 19*b*, Sūryāṣṭottaraśatanāma stotra 20*a*, Sūryastotra 21*a* and 21*b*, Sūryakavaca 22*a* and *b*, Ādityahṛdayam 23*b*, Sūryastavah 25*b*, Sūryapūjāvidhi 27*a*, Tṛcakalpavidhi 29*a*, Sūryasandhyāvandana 45*b*, Navagrahadigbandhana 47*a*, Sūryasandhyāvandana 50*a*, Sūryasahasranāmastotra 52*b*, Sūryasahasranāmāvali 68*a*, Sūryopaniṣat 81*a*, Saurāṣṭākṣarīmantra 84*b*, Sūryasaptatināmāvali 83*a*, Mahāsaurakhaṇḍa 85*b*.

Same work as that described under D. No. 694.

D. No. 17507

Pages, 11. Lines, 7 on a page. Telugu. Good. Extent, 120 granthas.

काशीखण्डः ।

KĀŚIKHANḌAḤ.

Begins on fol. 2*a* of the MS. described under D. No. 17506.

Complete.

Contains the 9th Adhyāya only of the Kāśikhaṇḍa.

Beginning :

शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिणेत्रं
शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहन्तम् ।
नागं पाशं च घण्टां प्रलयहुतवहं साङ्कुशं वामभागे
नानालङ्कारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥

शिवशर्मोवाच—

का इमा रूपलावण्यसौभाग्यनिधयः स्त्रियः ।
दिव्यालङ्कारधारिण्यो दिव्यभोगसमन्विताः ॥

गणा ऊचुः—

एता वरविलासिन्यो यज्ञभाजां प्रियङ्कराः ।
गीतज्ञा नृत्यकुशला वाद्यविद्याविचक्षणाः ॥
कामकेलिकलाभिज्ञा द्यूतविद्याविचक्षणाः ।
रसज्ञा भाववेदिन्यश्चतुराश्चाश्चितोक्तिषु ॥
नानादेशविशेषज्ञा नानाभाषासु कोविदाः ।

End :

ब्राह्मणैः सततं श्राव्यमेतदाख्यानमुत्तमम् ।
वेदपाठेन यत्पुण्यं तत्पुण्यं फलदायकम् ॥
ब्राह्मणा क्षत्रियाः वैश्याः शृण्वन्तोऽध्यायमुत्तमम् ।
पातकानि विसृज्येह गतिं यास्यन्त्यनुत्तमाम् ॥

Colophon :

इति काशीखण्डे सूर्यलोकवर्णनं नाम नवमोऽध्यायः ।

D. No. 17508

Pages, 20. Lines, 6 on a page. Telugu. Slightly injured. Extent, 100 granthas.

आदित्यहृदयम् ।

ADITYAHṚDAYAM.

Begins on fol. 7a of the MS. described under D. No. 17506.

Complete.

Similar to the work described under D. No. 5967.

Beginning:

अर्जुन उवाच—

ज्ञानं च धर्मशास्त्राणां गुह्याद् गुह्यतरं तथा ।
मया कृष्ण परिज्ञातं वाङ्मयं सचराचरम् ॥
सूर्यस्तुतिमयं न्यासं वक्तुमर्हसि माधव ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्ममृत्युजरादिभिः ।
भक्त्या पृच्छामि देवेश कथयस्व प्रयत्नतः ॥
सूर्यभक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत् ।
तदहं श्रोतुमिच्छामि त्वत्प्रसादेन माधव ।

श्रीभगवानुवाच —

रुद्रादिदेवतैस्सर्वैः पृष्टेन कथितं मया ।
वक्ष्येऽहं कर्मविन्यासं शृणु यत्नेन पाण्डव ॥
* * * * * *

अर्जुन उवाच—

नारायण सुरश्रेष्ठ पृच्छामि त्वां महायशः ।
कथमादित्यमुद्यन्तमुपतिष्ठेत्सनातनम् ॥

End:

नमोऽस्तु सूर्याय सहस्रभानवे
सहस्रसंख्यान्वितसंभवात्मने ।
सहस्रयोगोद्भवभावयोगिने
सहस्रसंख्यायुगधारिणे नमः ॥
* * * * * *

अग्निमीळे नमस्तुभ्यं —

Colophon :

इति भविष्योत्तरपुराणे कृष्णार्जुनसंवादे आदित्यस्तोत्रं संपूर्णम् ।

D. No. 17509

Pages, 3. Lines, 6 on a page. Telugu. Slightly injured. Extent, 20 granthas.

सूर्यद्वादशार्यास्तोत्रम् ।

SŪRYADVĀDAŚĀRYĀSTOTRAM.

Begins on fol. 16*b* of the MS. described under D. No. 17506.

Complete.

Similar to the work described under D. No. 11312.

Beginning :

अस्य श्रीसूर्यनारायणस्तोत्रस्य भगवानृषिः । अनुष्टुप्छन्दः । श्रीसूर्यनारायणो देवता । श्रीसूर्यनारायणप्रीत्यर्थे जपे विनियोगः ।

नमो भगवते पूष्णे विश्वरूपाय ते नमः ।
ज्योतिर्मयाय सूर्याय नमस्त्रैलोक्यचक्षुषे ॥
नमस्त्रैलोक्यनेत्राय कालकर्त्रे नमो नमः ।
सप्ताश्वरथसंयुक्तसप्तद्वीपचराय ते ॥

End :

मन्त्रैर्द्वादशभिर्नित्यं यः पठेत् प्रयतो नरः
द्वादशार्घ्यं नमस्कारं स्तोत्रं द्वादशसंख्यकम् ।
दत्वा सकलपापेभ्यो रोगेभ्यो मुच्यते भयात् ।
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ।
सप्तम्यां भानुवारे च द्वादश्यामर्कवासरे ।
नमस्कारार्घ्यपठनैर्द्वादशावृत्तिसंयुतैः ॥
द्वादशाब्दफलं देवि लभते नात्र संशयः ।
चैत्रमासेन वै सार्धमुक्ते केन क्रमेण तु ॥
मन्त्रेणार्घ्यनमस्कारैर्यः करोत्यर्कपूजनम् ।
सर्वान् कामानवाप्नोति सूर्यलोकं स गच्छति ॥

Colophon :

इति द्वादशार्यास्तोत्रं संपूर्णम् ।

D. No. 17510

Pages, 3. Lines, 6 on a page. Telugu. Slightly injured. Extent, 18 granthas.

सूर्यद्वादशार्यास्तोत्रम् ।

SŪRYADVĀDAŚĀRYĀSTOTRAM.

Begins on fol. 17*b* of the MS. described under D. No. 17506.

Complete.

Same work as that described under D. No. 11312.

This is also called Āryādvādaśakam.

D. No. 17511

Pages, 2. Lines, 6 on a page. Telugu. Slightly injured. Extent 16 granthas.

सूर्यसप्तार्यास्तोत्रम् ।

SŪRYASAPTĀRYĀSTOTRAM.

Begins on fol. 18*b* of the MS. described under D. No. 17506.

Complete.

Same work as that described under D. No. 11324.

D. No. 17512

Pages, 2. Lines, 6 on a page. Telugu. Slightly injured. Extent, 16 granthas.

सूर्यार्यानवकस्तोत्रम् ।

SŪRYĀRYĀNAVAKASTOTRAM.

Begins on fol. 19*b* of the MS. described under D. No. 17506.

Similar to the work described under D. No. 11324.

Beginning :

घृणया भूतसुरगणया जगतः कृत्स्नं तमो हरतः ।
मामकतमसो हरणे तरणे करते श्रमस्त्वास्ते ॥

णिरिति प्रयविहितः स्यादस्याधारभावमापन्नः ।
जगतां कर्मसु यस्त्वं मिहिर त्वां कर्मसाक्षिणं वन्दे ॥

End :

आर्या नव सावित्र्यः प्रातर्मध्यंदिने तथा सायम् ।
पठतां सकलजनानामीप्सितसिद्धिं रविः कुरुते ।

Colophon :

आर्यानवकं संपूर्णम् ।

D. No. 17513

Pages, 2. Lines, 6 on a page. Telugu. Slightly injured. Extent, 16 granthas.

सूर्याष्टोत्तरशतनामस्तोत्रम् ।

SŪRYAṢṬOTTARAŚATANĀMASTOTRAM.

Begins on fol. 20*a* of the MS. described under D. No. 17506.

Complete.

Same work as that described under D. No. 9348.

D. No. 17514

Pages, 2. Lines, 6 on a page. Telugu. Slightly injured. Extent, 18 granthas.

सूर्यस्तोत्रम् ।

SŪRYASTOTRAM.

Begins on fol. 21*a* of the MS. described under D. No. 17511.

Complete.

Similar to the work described under D. No. 11325.

Beginning :

नमः सवित्रेऽव्यक्ताय मूर्तये परमात्मने ।
सततं त्रिजगत्सृष्टिस्थितिसंहारकारिणे ॥
छन्दोमयाय स्वच्छन्दचारिणे चारुरोचिषे ।
ब्रह्मादिगृहदीपाय सदसत्कर्मसाक्षिणे ॥
चक्षुषां चक्षुषे नित्यं नमोऽप्रतिमतेजसे ।
पुरादाय रसं भूमेः काले विसृजासि प्रभो ॥

नारदः—

एवं संस्तुवतस्तस्य भगवान् भक्तवत्सलः ।
दिव्याकृतिः पुरस्तस्थावागत्य निजमण्डलात् ।
तं दृष्ट्वा सहसा देवं हृष्टमूर्ति च वै भुवः ।
पपात दण्डवद् भूमौ प्रसीदेति वदन् मुहुः ।
समुत्थाप्याह देवेशो वरं वरय सुव्रत ।

D. No. 17515

Pages, 2. Lines, 6 on a page. Telugu. Slightly injured. Extent 10 granthas.

सूर्यस्तोत्रम् ।

SŪRYASTOTRAM.

Begins on fol. 21*b* of the MS. described under D. No. 17506.

Complete.

Similar to the work described under D. No. 11325.

Beginning :

नमस्त्रिमूर्तये तुभ्यं नमस्त्रैलोक्यचक्षुषे ।
त्रयीमयाय देवाय भास्कराय नमो नमः ।
नमस्त्रैलोक्यनाथाय नमस्त्रैमूर्तिधारिणे ।
त्रिगुणात्मन् नमस्तुभ्यं भास्कराय नमो नमः ।
इत्येवमादिभिस्तोत्रैः सौरसूक्तैस्सुशोभनैः ।
संस्तुतस्तं मुनिं दृष्ट्वा कृपया त्विदमब्रवीत् ।
वरं वरय दास्यामि यदिष्टं मुनिपुङ्गव ।

Colophon :

कृष्णमहात्म्ये एकात्रिंशाध्याये कौण्डिन्यमुनिकृतस्तोत्रं सपूर्णम् ।

D. No. 17516

Pages, 2. Lines, 6 on a page. Telugu. Slightly injured. Extent, 12 granthas.

सूर्यकवचः ।

SŪRYAKAVACAḤ.

Begins on fol. 22*a* of the MS. described under D. No. 17506.

Complete.

Similar to the work described under D. No. 7577.

Beginning :

अस्य श्रीसूर्यकवचस्तोत्रमन्त्रस्य । वशिष्ट ऋषिः ।
श्रीसूर्यनारायणप्रीत्यर्थे जपे विनियोगः ।

अथ ध्यानम् :

अथ ध्यानं प्रवक्ष्यामि कवचं सर्वकामदम् ।
इदं तु कवचं धृत्वा विचरेद्विगतज्वरः ॥

End :

संवत्सरमुपासित्वा सुवर्णतनुतां व्रजेत् ।
सर्वसिद्धिमवाप्नोति विष्णुलोके महीयते ॥

सततं प्रातरुत्थाय पठेद्रोगाद्विमुच्यते ॥

Colophon :

इति श्रीस्तोत्ररत्नाकरे रोगनाशने स्कन्दपुराणे सूर्यकवचस्तोत्रं संपूर्णम् ।

D. No. 17517

Pages, 3. Lines, 6 on a page. Telugu. Slightly injured. Extent, 20 granthas.

सूर्यकवचः ।

SŪRYAKAVACAḤ.

Begins on fol. 22*b* of the MS. described under D. No. 17506.

Complete.

Same work as that described under D. No. 7578 with different end as given below.

End :

आदित्यकवचं दिव्यमभेद्यं वज्रसन्निभम् ।
संवत्सरमुपासित्वा सुवर्णतनुतां व्रजेत् ॥

Colophon :

आदित्यकवचं संपूर्णम् ।

D. No. 17518

Pages, 5. Lines, 6 on a page. Telugu. Slightly injured. Extent, 34 granthas.

सूर्यस्तवः ।

SŪRYASTAVAḤ.

Begins on fol. 23*b* of the MS. described under D. No. 17506.

Complete.

Same work as that described under D. No. 5945.

D. No. 17519

Pages, 3. Lines, 6 on a page. Telugu. Slightly injured. Extent, 34 granthas.

सूर्यस्तवः ।

SŪRYASTAVAḤ.

Begins on fol. 25*b* of the MS. described under D. No. 17506.

Complete.

Similar to the work described under D. No. 11325.

Beginning :

हंसो भानुस्सहस्रांशुस्तपनस्तापनो रविः ।
विकर्तनो विवस्वांश्च विश्वकर्मा विभावसुः ॥
विश्वरूपो विश्वकर्ता मार्ताण्डो मिहिरोऽंशुमान् ।
आदित्यश्चोष्णगः सूर्योऽर्यमा ब्रध्निर्दिवाकरः ।

End :

एकाक्षरथचक्राय सहस्रकिरणाय च ।
निस्सङ्गस्यन्दनार्थाय निस्सङ्गाश्वायते नमः ॥
वृष्टिप्रदाय देवाय नमस्तेऽनूरुसारथे ।
स्तोत्रं निशम्य भगवान् सूर्यनरायणः प्रभुः ॥
सत्राजितं तदोवाच गृह्णीष्व वरमुत्तमम् ।

Colophon :

इति श्रीवाल्मीकीये धर्मखण्डे सत्राजित्कृतसूर्यस्तवं संपूर्णम् ।

D. No. 17520

Pages, 4. Lines, 6 on a page. Telugu. Slightly injured. Extent, 28 granthas.

सूर्यपूजाविधिः ।

SŪRYAPŪJĀVIDHIḤ.

Begins on fol. 27*a* of the MS. described under D. No. 17506.

Complete.

Similar to the work described under D. No. 8732.

Beginning :

अथैवं कृतप्रातस्सन्ध्यावन्दनाक्रियो दत्तसूर्यार्घ्यः सूर्यपूजां कुर्यात् । तदुक्तं नन्दिकेश्वरसंहितायाम् ।

यावन्न दीयते चार्घ्यं भास्कराय निवेदितम् ।
तावन्न पूजयेद्विष्णुं शङ्करं वा सुरेश्वरम् । इति ।

बृहत्स्तवराजे—

आदित्यं पूजयेदादौ प्रत्यक्षं लोकसाक्षिणम् ।
अन्यथा नैव सिद्धिः स्यात् कल्पकोटिशतैरपि ।
स्नानान्ते विधिवत्सन्ध्यां तर्पणं सूर्यपूजनम् ।
कृत्वा पूजालये मूर्तिपञ्चकं पूजयेद्बुधः ।

End :

श्रीचक्रे सूर्यमावाह्य षोडशोपचारैरुपचर्य मूलमन्त्रं यथाशक्ति जपित्वा जपं समर्प्य प्रणमेदिति सूर्यपूजाविधिः । अयं मुख्यकल्पः । तदशक्तः सूर्यमण्डलमेवावसारणं सूर्यमभ्यर्च्य अर्घ्यं दद्यादिति मध्यमः । केवलमन्त्रमात्रेणार्घ्यप्रदानमित्यापत्कल्पः ।

Colophon :

इति श्रीसूर्यपूजाविधिः समाप्तः ।

D. No. 17521

Pages, 34. Lines, 6 on a page. Telugu. Slightly injured. Extent, 350 granthas.

तृचकल्पः ।

TṚCAKALPAḤ.

Begins on fol. 29*a* of the MS. described under D. No. 17506.

Similar to the work described under D. No. 7854.

Beginning :

पूर्वोक्त एवं गुण—तिथौ श्रीसूर्यनारायणमुद्दिश्य सूर्यनारायणप्रीत्यर्थं आदित्यपुराणोक्ततृचकल्पविधानेन हरिहरब्रह्मात्मकस्य मित्रादिद्वादशनामात्मकस्वरूपिग उरणादिद्वादशमासाधिपस्वरूपस्य द्वादशावरण सहितस्य त्रयीमूर्तेर्भगवतः श्रीसूर्यनारायणस्य प्रीतिद्वारा मम शरीरे वर्तमानवर्तिष्यमाणवातपित्तकफोद्भवनानाकारण निमित्तज्वरक्षयपाण्डुकुष्ठरोग-शूलातिसारधातुक्षयप्रमेहभगन्दरादिनामकसमस्तामयनिदानभूतदुरितनिवृत्ति द्वारा समस्तामयानिर्हरणार्थं क्षिप्रारोग्यदीर्घायुष्यप्राप्तये "उद्यन्नद्येति" तृचमन्त्रेण रक्तचन्दनमिश्रिततिलतण्डुलयवदूर्वाङ्कुरकुसुमजलपूरित-ताम्रपात्रेणार्घ्यप्रदानं करिष्ये ।

End :

तदस्त्रैर्वस्त्रशक्त्याद्यै रुद्रावरणमर्चयेत् ।
मेषादिराशिभिश्चैव द्वादशावरणार्चनम् ॥

Colophon :

तृचमन्त्रं संपूर्णम् ।

D. No. 17522

Pages, 3. Lines, 6 on a page. Telugu. Slightly injured. Extent, 20 granthas.

सूर्यसन्ध्यावन्दनम् ।

SŪRYASANDHYĀVANDANAM.

Begins on fol. 45*a* of the MS. described under D. No. 17506

Complete.

Beginning :

सूर्यनारायणाय नमः । देवी गायत्री छन्दः । प्राणायामे विनियोगः । पूर्वोक्त एवं + + तिथौ अस्माकं सह कुटुम्बानां क्षेम-स्थैर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थं समस्ताभ्युदयार्थं छायोषासमेतश्रीसूर्य नारायणप्रीत्यर्थं श्रीसूर्यसन्ध्यावन्दनं करिष्ये ।

End :

गं महागणपतये ध्यानम् । गं महागणपतये आवाहनम् । गं महा गणपतये सिंहासनम् । गं महागणपतये पाद्यम् । गं महागणपतये अर्घ्यम् । गं महागणपतये आचमनीयम् । गं महागणपतये पञ्चामृत स्नानम् । गं महागणपतये वस्त्रयुग्मम् । गं गणपतये यज्ञोपवितम् - गं गणपतये अक्षतान् । दूर्वान् । गं गणपतये धूपम् । गं गण पतये दीपम् । गं गणपतये नैवेद्यम् । गं गणपतये तांबूलम् । गं गणपतये नीराजनम् । गं गणपतये मन्त्रपुष्पम् । गं गणपतये प्रदक्षिणनमस्कारान् समर्पयामि ।

यस्य स्मृत्या च ना × × × × × × ×
मन्त्रहीनं क्रियाहीनं भक्तिहीनं गणाधिप ।
यत् पूजितं मया देव परिपूर्णं तदस्तु ते ॥

D. No. 17523

Pages, 6. Lines, 6 on a page. Telugu. Slightly injured. Extent, 54 granthas.

नवग्रहदिग्बन्धनमन्त्रः ।

NAVAGRAHADIGBANDHANAMANTRAḤ.

Begins on fol. 47*a* of the MS. described under D. No. 17506.

Complete.

On a spell relating to the nine planetary deities.

Beginning :

अस्य श्रीनवग्रहदिग्बन्धनमहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुस्सामाथर्वाणि छन्दांसि । नवग्रहदेवतायै हृदये ह्रां बीजाय दक्षिणस्तने ह्रीं शक्तये वामस्तने ह्रूं कीलकाय गुह्ये नवग्रह दशदिशा दिग्बन्धनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

अपमृत्युमपक्षुधं = स्वाहा ।

अपमृत्यो अधोभागे निकृन्तय निकृन्तय । ओं नमो नारायणाय । घृणिः सूर्य आदित्यं सहस्रार हुं फट् स्वाहा । अपमृत्युः सुप्रीतो वरदो भवतु । पूर्णमदः पूर्णमिदम् ।

D. No. 17524

Pages, 5. Lines, 5 on a page. Telugu. Slightly injured. Extent, 25 granthas.

सूर्यसन्ध्यावन्दनम् ।

SŪRYASANDHYĀVANDANAM.

Begins on fol. 50*a* of the MS. described under D. No. 17506.

Complete.

Similar to the work described under D. No. 17521.

Beginning :

ओं ह्रीं उद्यन्नद्यमित्रमहः मित्राय नमः । आत्मतत्वाय स्वाहा । ओं ह्रां आरोहन्नुत्तरां दिवम् रवये नमः । महाविद्याय स्वाहा । ओं ह्रूं हृद्रोगं मम सूर्य । सूर्याय नमः । शिवतत्वाय स्वाहा । आ मूलेन प्राणानायम्य ।

End :

ह्रां हरिमाणं निदध्मसि । ह्रूं उदगादयमादित्यः । विश्वेन सहसा सह । द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रथम् । हिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नमः । पूववदाचमनं कुर्यात् ।

Colophon :

श्रीसूर्यसन्ध्यावन्दनं समाप्तम् ।

D. No. 17525

Pages, 31. Lines, 6 on a page. Telugu. Slightly injured. Extent, 284 granthas.

सूर्यसहस्रनामस्तोत्रम् ।

SŪRYASAHASRANĀMASTOTRAM.

Begins on fol. 52*b* of the MS. described under D. No. 17506.

Complete.

Same work as that described under D. No. 9344.

D. No. 17526

Pages, 25. Lines, 7 on a page. Telugu. Slightly injured. Extent, 30 granthas.

सूर्यसहस्रनामावलि ।

SŪRYASAHASRANĀMĀVALIḤ.

Begins on fol. 68*a* of the MS. described under D. No. 17506.

Complete.

Similar to the work described under D. No. 9343.

But in the Nāmāvali form.

Beginning :

आदित्याय नमः । आदिदेवाय नमः । भास्वते नम । विश्वमूर्तये नम ।

End :

चराचरस्वरूपाय नमः । सर्वेशाय नमः । सूर्याय नमः । छायोषासमेतश्रीसूर्यनारायणा(य) नमः ।

Colophon :

सूर्यसहसूनामालु संपूर्णम् ।

D. No. 17527

Pages, 5. Lines, 6 on a page. Telugu. Slightly injured. Extent, 32 granthas.

सूर्योपनिषत् ।

SŪRYOPANIṢAT.

Begins on fol. 81*a* of the MS. described under D. No. 17506.

Complete.

Same work as that described under D. No. 832.

D. No. 17528

Pages, 3. Lines, 6 on a page. Telugu. Slightly injured. Extent, 14 granthas.

सौराष्टाक्षरीमन्त्रः ।

SAURĀṢṬĀKṢARĪMANTRAḤ.

Begins on fol. 84*b* of the MS. described under D. No. 17506.

Complete.

Same work as that described under D. No. 7615.

D. No. 17529

Pages, 3. Lines, 6 on a page. Telugu. Slightly injured. Extent, 18 granthas.

सूर्यसप्ततिनामावलिः

SŪRYASAPTATINĀMĀVALI.

Begins on fol. 83*a* of the MS. described under D. No. 17506.

Complete.

Similar to the work described under D. No. 17526.

Beginning :

हंसाय नमः । भानवे नमः । सहस्रांशवे नमः । तपनाय नमः । तापनाय नमः । रवये नमः । विकर्तनाय नमः । विवस्वते नमः । विश्वकर्मणे नमः । विभावसवे नमः । विश्वरूपाय नमः । विश्वकर्त्रे नमः ।

End :

पद्मिनीनाथाय नमः । कुशेशयकराय नमः । हरये नमः । घर्मरश्मये नमः । दुर्निरीक्ष्याय नमः । चण्डांशवे नमः । कश्यपात्मजाय नमः ।

D. No. 17530

Pages, 12. Lines, 5 on a page. Telugu. Slightly injured. Extent, 100 granthas.

महासौरखण्डः ।

MAHĀSAURAKHAṆḌAḤ.

Begins on fol. 85*b* of the MS. described under D. No. 17506.

Complete.

Same work as that described under D. No. 8026.

D. No. 17531

Palm leaf. 17¼ × 1½ inches. Pages, 76. Lines, 6, 7, 8, 9 on a page. Telugu. Injured. Old. Extent, 1,216 granthas.

चातुर्मास्यानुक्रमणिका ।

CĀTURMĀSYĀNUKRAMAṆIKĀ.

Complete.

Similar to the work described under D. No. 2937.

Beginning :

चातुर्मास्यप्रयोगा लिख्यन्ते । तत्र प्रकारद्वयमुक्तमापस्तंबेन— चैत्र-फाल्गुनयोर्मासयोश्चान्द्रमासयोरन्यतरपौर्णमास्यां वैश्वदेव . . . एकैकं पर्वत्यक्तः पक्षः । वसन्ते वैश्वदेवेन प्रावृषे वरुणप्रघासैः शरदि साकमेधैरिति द्वितीयः पक्षः ।

द्वितीयपक्षे तत्तदृत्वन्तर्गते यस्मिन् कस्मिश्चि . . . . त्र मासाद्यपरः । फाल्गुन्यां स्याद्यमित्याद्यपक्षे । उत्तरफल्गुनीयोग एव वैश्वदेवं न पूर्वाफाल्गुनीयोगे । बोधायनेनान्यः प्रकार उक्तः ।

End :

यस्तु सांवत्सरिकाणि व्याख्यास्यामः । पुनरालभमानस्यत्यापस्तम्बः । चातुर्मास्यानि वा पुनरित्याश्वलायनसूत्रात् पुनश्चातुर्मास्यानि चिकीर्षति तस्य न होमादि । यदा तु द्व्यहादौ शुनासीरीयः तदानन्तरपर्वणि होमः पशुर्वा ।

Colophon :

इति चातुर्मास्यानुक्रमणिका समाप्ता

D. No. 17532

Palm leaf. 15½ × 1½ inches. Pages, 20. Lines, 6 on a page. Telugu. Injured. Old. Extent, 210 granthas.

द्विरूपकोशः ।

DVIRŪPAKOŚAḤ.

Begins on fol. 1*a*. The other works herein are :—Śyāmalādaṇḍaka 11*a*. Aṅgadadautya 13*a*. Agnihotramantraḥ 16*a*.

